३०१
६.२

माणिकचन्द-दिगम्बरजैनग्रन्थमाला, पञ्चम पुष्प ।

उभयभाषाकविचक्रवर्ति-श्रीहस्तिमल्लविरचितं


मैथिली-कल्याणम्

नाटकम् ।



पाठमनिवासि पण्डित-मनोहरलालशास्त्रिणा

संशोधितम् ।



प्रकाशिका—

माणिकचन्द-दिगम्बरजैनग्रन्थमालासमितिः ।

श्रावण, वीर नि. संवत् २४४२ ।

विक्रमाब्द १९७३ ।



प्रस्तावना ।

हस्तिमल्लकवेः परिचयः ।

सोऽयं समस्तजगदूर्जितचारुकीर्तिः
स्याद्वादशासनरमाश्रितशुद्धकीर्तिः ।
जीयादशेषकविराजचक्रवर्ती
श्रीहस्तिमल्ल इति विश्रुतपुण्यमूर्तिः ॥ (अध्यपार्श्वः)

एतद्ग्रंथकर्तुर्हस्तिमल्लेति नाम प्रथितमासीत् । अयं च गोविंदभट्टाख्यविदुषः सूनुर्दाक्षिणात्य आसीत् । गोविंदभट्टो वत्सगोत्रीयो ब्राह्मणः पूर्वमजैन आसीत्, पश्चाद्गुरुसमंतभद्रविरचितदेवागमसूत्राध्ययनेन जैनो जातः । ग्रंथस्यास्य द्वितीयपृष्ठे हस्तिमल्लेन सूत्रधारमुखेनाख्यापितः " सरस्वतीविस्मयनीयोपायनस्य भट्टारगोविंदस्वामिसूनुना अंजनापवनंजयप्रमुखाणामपि रूपकाणां प्रवर्तकेन विरचितं हस्तिमल्लेन । अस्मिन् तेन कविना स्वपितृनाम्ना सार्द्धं यत् 'भट्टार' 'स्वामी' इत्येतत्पदद्वयं योजितं तस्मात् प्रतीयते कदाचित् गोविंदभट्टः तदानीं साधुभट्टारको वा प्रथितः स्यात् । अन्यच्च विक्रांतकौरवीयप्रशस्तौ वीरसेन-जिनसेन गुणभद्राद्याचार्यपरंपराया उल्लेखं कृत्वा लिखितं ।

तच्छिष्यानुक्रमे यातेऽसंख्येये विश्रुतो भुवि ।
गोविंदभट्ट इत्यासीद्विद्वान् मिथ्यात्ववर्जितः ॥

तस्यां यत् गोविंदभट्टो गुणभद्रादिशिष्यपरंपरायां निरूपितः अनेनापीति प्रतीयते यद् गोविंदभट्टो गृही नासीत् साधुभट्टारको वा स्यात् ।

अस्ति गोविंदभट्टो दक्षिणदेशनिवासी । तत्र स्वर्णयक्षी नाम्नी काचिद्देवी समाराधिता जाता । तत्प्रसादेन तस्य एतन्नवपुत्रप्राप्तिः संजाता–१ श्रीकुमार, २ सत्यवाक्य, ३ देवरवल्लभ, ४ उदयभूषण, ५ हस्तिमल्ल, ६ वर्द्धमानश्च । एते षडपि

कवयो विद्वांसश्च बभूवुः । हस्तिमल्लेन एतन्मैथिलीकल्याणनाटकस्य प्रस्तावनायां निजाप्रजः सत्यवाक्य. 'श्रीमतोकल्याण' प्रभृतेर्ग्रंथानां कर्ता प्रदर्शितः परं सत्यवाक्यस्येदानींतनपर्यंतं कोपि ग्रंथो नोपलब्धः । एतेषु कुमारकविनिर्मित आत्मप्रबोधाख्यो लघुग्रंथो ईडराख्यपुरस्य सरस्वतीभवने अस्ति । स हस्तिमल्लभ्रातृश्रीकुमारस्यैव वान्यस्य कस्यापीति न प्रतीयते ।

'राजावली' कथातः ज्ञायते यत् हस्तिमल्लस्य पार्श्वपंडितादयः पुत्रा आसन् लोकपालार्योस्य एकः शिष्यश्च । अवश्यमेव तेपि विद्वांसः कवयश्च भविष्यंति किंतु तेषां विषये नाद्यापि पर्यन्तं किंचिद् ज्ञातम् ।

हस्तिमल्लकवेरनुजस्य वर्धमानकवेर्विषये जनानामयं विश्वासोस्ति यत्स गणरत्नमहोदधिनामकव्याकरणविषयग्रंथस्य कर्त्ता, परमयं भ्रमः । ततो गणरत्नकर्त्ता विक्रमसंवत् ११९७ अनुमिते अर्थात् हस्तिमल्लसमयात् सार्धशतवर्षपूर्वमासीत् । किंच स गोविंदसूरेः शिष्य आसीत् अयं च गोविंदभट्टस्य सूनुः । अन्यच्च स साधुरयं च गृहस्थः । अपरं च स श्वेतांबाम्नायी प्रतीयते अयं तु दिगंबरसंप्रदायानुगोस्ति ।

गणरत्नमहोदधिकर्त्ता श्वेतांबर आसीत् । अस्मिन् विषयेऽनेकानि प्रमाणानि संति । पूर्वं तु तेन स्वकीयग्रंथे यत् शतश उदाहरणानि दत्तानि तानि सर्वाणि अजैनानां श्वेतांबरग्रंथकर्तृणामेव, दिगंबराणामेकमपि न दत्तं । द्वितीयं पूर्वोक्तोदाहरणेषु द्वौ श्लोकावेतादृशौ स्तो यतोः श्वेतांबराणां प्रशंसा दिगंबराणां च निंदा कृतासीत् ।

यथा वीराचार्यणाम्—

युक्तं सितांबराणां तुम्बग्रहणं कुटुंबपरिहरणं ।
कथमन्यथा तरीतुं शक्यः संसारतोयनिधिः ॥

यथा श्रीसागरचंद्रस्य— (गणरत्नमहोदधिः, पृष्ठ २२)

अकल्पितप्राणसमास्तमागमा मलीमसांगा धृतभैक्षवृत्तयः ।
निर्ग्रंथतां त्वत्परिपंथिनो गता जगत्पते किं त्वजिनावलंबिनः ॥
(गणर. पृष्ठ १६४)

गणरत्नमहोदधिकर्तृनिर्मितं किमपि सिद्धराजवर्णनाख्यं काव्यं वर्तते तस्मिन् चौलुक्यनरेशसिद्धराजस्य वर्णनमस्ति । एतत्काव्यस्यानेके श्लोका गणरत्नमहोदधावुदाहरणस्वरूपेणोद्धृता । अणहिल्लपुर (पाटण) नरेशस्य सिद्धराजस्य श्वेतांबरजैनसंप्रदाये महती कृपासीत् । अनेन प्रतीयते यत् गणरत्नमहोदधेः कर्ता गुर्जरदेशसन्निकटस्थः श्वेतांबरश्च स्यात् । सिद्धराजाणहिलपुरप्रशंसायां कश्चिदपि दिगंबराम्नायी ग्रंथो लिखिष्यतीति न किंचित्संभावना प्रतीयते ।

सारांश इत्येव यत् हस्तिमल्लस्य भ्रातुर्वर्धमानकवेः गणरत्नमहोदधिकर्तुश्च नामसाम्यं विहाय नान्यः कोपि संबंधः । अस्मिंश्च विषयेऽनेकानि प्रमाणानि निरूपयितुं शक्यानि ।

हस्तिमल्लो महान् प्रख्यातकविः प्रतीयते । तस्य विरुदावल्याः प्रशंसासूचकपदेभ्य एतत् सूचितं भवति । विक्रांतकौरवे स स्वं सरस्वतीस्वयंवरवल्लभ, महाकवितल्लजेति निरूपितवान् । ग्रंथस्यारंभते स स्वीयं नाम 'सूक्तिरत्नाकरेति ग्रथयामास । तस्याग्रजेन सत्ययाक्येन स 'कवितासाम्राज्यलक्ष्मीपतिः' इति कथयित्वा संबोधितः ।

अनेन प्रतीयते हस्तिमल्ल इति कवेरिदं वास्तविकनामधेयं नास्ति किंत्विदं तद्गुणविशेषेणैव निश्चितं । अस्मिन् विषये अय्यपार्यनामकविदुषा विरचिते जिनेंद्रकल्याणाभ्युदयनाम्नि ग्रंथे श्लोको दत्तः—

सम्यक्त्वं सुपरीक्षितं मदगजे मुक्तं सरण्यापुरे
चास्मिन् पाण्ड्यमहीश्वरेण कपटाद्धंतुं स्वमभ्यागते ।
शैत्यूषं जिनमुद्रधारिणमपास्यासौ मदध्वंसिना
श्लोकेनापि मदेभमल्ल इति यः प्रख्यातवान् सूरिभिः ॥ १६ ॥

अनेन प्रतीयते यत् हस्तिमल्लेन हंतुमागतस्य मदमत्तहस्तिनो मदो दूरीकृतः कश्चिज्जिनमुद्राधारी धूर्तश्चैकेन श्लोकेन निर्मर्दीकृतः । अतस्तस्य नाम मदेभमल्लो हस्तिमल्लो वा प्रथितं ।

विक्रांतकौरवनाटकस्य प्रथमांकेपि श्लोको वर्तते तस्मिन् कवेर्हस्तियुद्धे विजयप्राप्तेस्तन्निमित्तपांड्यनरेश्वरद्वारा सत्कारप्राप्तेश्चोल्लेखोस्ति—

श्रीवत्सगोत्रजनभूषणगोपभट्ट-
प्रेमैकधामतनुजो भुवि हस्तियुद्धात् ।
नानाकलांबुनिधिपांड्यमहेश्वरेण
श्लोकैः शतैस्सदसि सत्कृतवान् बभूव ॥ ४० ॥

उपर्युक्तश्लोकद्वयेनाजनापत्तनंजयस्य निम्नलिखितप्रशस्तिश्लोकेन प्रतीयते यत् हस्तिमल्लः पांड्यदेशीयराज्ञः कृपापात्रोऽभूत् तद्राजधान्यां च स्वबंधुभिः सह निवासं चकार—

श्रीमत्पाण्ड्यमहीश्वरे निजभुजादंडाचलंवीकृते
कर्णाटावनिमंडलं पदनतानेकावनीशेऽवति ।
तत्प्रीत्यानुसरन्स्वबंधुनिवहैर्विद्वद्भिरातैस्समं
जैनागारसमेतसंतरनमे (?) श्रीहस्तिमल्लोऽवसत् ॥

---

१ अय्यपार्येण १३७६ विक्रमसंवत्सरे जिनेंद्रकल्याणाभ्युदयस्य रचना कृता ।

द्रविडदेशसन्निहितस्य मदुरा (दक्षिणमथुरा) धाः समीपस्थप्रदेशानां पाण्ड्य-देश इति नाम आसीत् । कविस्थितिसमये तत्रत्यः पांड्यमहेश्वरो नृपो बभूव । अयं सुंदरपांड्य (प्रथम) इत्युत्तराधिकारी स्यात् । तस्य राज्यकालः १३०७ वि० संवत्सरात्प्रारंभो भवति । एनं कवी राजाधिराज-नानाकलाकुनिधीति लिखितवान् अयं कवेर्महोदरश्चकार ।

कर्णाटककविचरितस्य कर्त्रा हस्तिमल्लकविसमयः ई० सन् १२९० अर्थात् १३४७ विक्रमाब्दो निश्चितः । अयमेव च सम्यक् प्रतीयते, यत अभ्यर्णेन स्वीयजिनेन्द्र-कल्याणाभ्युदयग्रंथः १३७६ विक्रमाब्दे समाप्तिं नीतः, तस्मिंश्च हस्तिमल्लस्योल्लेखः कृतः । स चोल्लेख एतादृशो येन हस्तिमल्लस्तत्समकालीनः तस्य कविना सम साक्षात्परिचयो वा प्रतीयेत ।

हस्तिमल्लो गृहस्थ आसीत न गृहत्यागी, एतत्कथनस्योल्लेखो नेमिचंद्रकृतप्रतिष्ठा-तिलकस्यास्मिन् श्लोके कृतः—

परवादिहस्तिनां सिंहो हस्तिमल्लस्तदुद्भवः ।
गृहाश्रमी बभूवार्हच्छासनादिप्रभावकः ॥ १३ ॥

हस्तिमल्लो महान् प्रसिद्धकविः प्रतीयते । तस्य प्रतिभा परं तथाटकेभ्य अनुमीयते । अधुनापर्यंतं तस्य केवलं नाटकग्रंथा एव उपलब्धाः, तेष्वेको विक्रांतकौरवःप्रकाशितः । द्वितीयोऽयं मैथिलीकल्याणाख्यकग्रंथः प्रकाश्यते । तृतीयः सुभद्राहरणः चतुर्थोऽञ्जनापवनंजयश्चापि उपलब्धा आसन्, यथोः प्रकाशने प्रयत्नो विधास्यते । हस्ति-मल्लस्यैक आदिपुराणः पुरुचरितं वा नाम ग्रंथः **श्रीदौर्बलिशास्त्रिणां** सरस्वती-भवने वर्तते यस्मिन्नेकसहस्रानुमिताः श्लोकाः संति, परं स अस्मद्दृष्टिपथे नायातः ।

देवचंद्रकविः स्वीय 'राजावलीकथायां' हस्तिमल्लमुभयभाषाकविचक्रवर्तीति लिखितवान् । अनेन प्रतीयते यत्स संस्कृतं विहाय कन्नडीभाषायाश्च कविरासीत् एतद्भाषायां चापि तेन रचना विहिता स्यात् । अस्य ग्रंथस्य संशोधनेऽस्माकं मित्रवर्येण श्रीयुत **कुमारस्वामी** इतिनाम्ना विदुषा सहायता कृतास्तेभ्योंतःकरणेन शतशो धन्यवादं ददामीति । कृतं पल्लवनेनेति शम् । *

होदावाड़ी बम्बई नं. ४.
श्रावण कृष्ण त्रयोदशी.
संवत् १९७३ वि०

निवेदकः—
मनोहरलाल-शास्त्री,

* श्रीयुत नाथूरामप्रेमी-जैनहितैषिसम्पादकेन हिन्दीभाषायां लिखितस्य लेखस्यानुवादोऽयम् ।



नमः परमात्मने ।

अथ श्रीमद्धस्तिमल्लकविविरचितं

मैथिलीकल्याणं

नाटकम् ।



यः प्रस्तोता त्रिलोक्यां प्रतिहतविपदां संमतानां कृतीनां
यं च स्तोता स्वयं च स्तुतिशतपदवीं वाग्वधूवल्लभानाम् ।
कल्यः कल्याणभागिश्रियमनुपरमामातनोतानरूपः
सोऽयं मह्यं विधेयाद्दशरथतनयः साधु वो रामभद्रः ॥ १ ॥

(नांद्यंते)

सूत्रधारः—अलमतिविस्तरेण । (नेपथ्याभिमुखमवलोक्य) आर्ये इतस्तावत् ।

(प्रविश्य)

नटी—अज्ज इयम्मि[1] ।

सूत्रधारः—गृह्यतां नेपथ्यरचना ।

नटी—किं णु खु दाणिं अज्जो सविसेसं समुसुओ संगीआरंभे[2] ।

---

१ आर्य इयमस्मि । २ किं नु खलु इदानीं आर्यः सविशेषं समुत्सुकः संगीतारंभे ।

सूत्रधारः—आर्ये साधु लक्षितं अद्य खलु वसंतोत्सवे सबहुमानमाहूयाज्ञापितोऽस्मि विशेषवेदिन्या गृहीतनाट्यशास्त्रोपनिषदा परिषदा, यथा मैथिलीकल्याणदर्शनोत्सुकः सकलोपि सामाजिकजनः, भवानेव तत्र निष्णातः तदिदानीं तदेव तावत् यथावत्प्रयोक्तव्यमिति ।

नटी—कुदो[1] खु पेक्खआणं एअंतदो तहिं आसंघा ।

सूत्रधारः—आर्ये किं न जानीषे तत् खलु निखिलशास्त्रतीर्थावगाहपवित्रीकृतधिषणस्य मध्यमलोकधिषणस्य निःशेषनिःपीतधर्मामृतरसायनस्य सरस्वतीविस्मयनीयोपायनस्य भट्टारकगोविंदस्वामिनः सूनुना श्रीकुमारसत्यवाक्यदेवरचल्लभोदयभूषणानां सुभाषितरत्नभूषणानामनुजेन कवेर्वर्धमानस्याग्रजेनांजनापवनंजयप्रमुखाणामपि रूपकाणां प्रवर्तकेन विरचितं हस्तिमल्लेन ।

नटी—तेण[2] हि जुंजइ तदो एव खु अस्सवि तहिं बहुमाणो ।

सूत्रधारः—को वा न बहु मन्यते । एवं च खल्वसौ श्रीमतीकल्याणप्रभृतीनां कृतीनां कर्त्रा सत्यवाक्येन सूक्तिरसावर्जितचेतसा ज्यायसा कनीयानप्युपश्लोकितः ।

किं वीणागुणरंजितैः किमथवा सांद्रैर्मृदुस्यन्दिभि-
र्विस्राम्यत्सहकारकोरकशिखाकर्णावतंसैरपि ।
पर्याप्ताः श्रवणोत्सवाय कविता साम्राज्यलक्ष्मीपते
सत्यं नस्तव हस्तिमल्लसुभगास्तास्ताः सदा सूक्तयः ॥ २ ॥

नटी—वंसीकरेइ[3] खु कविअणं सुभासिदं ।

सूत्रधारः—साधूक्तं तथापि सज्जेषु तेषु तेष्वपि कालं परितः परिषेयेषु कविः सूक्तिभिरेवात्मानं काव्यव्यसने विनोदयति ।

---

१. कुतः खलु प्रेक्षकाणां एकांततः तस्मिन्नासक्तिः । २ तेन हि युज्यते तत एव खलु अस्यापि तस्मिन् बहुमानः । ३ वशीकरोति खलु कविजनं सुभाषितं ।

नटी—केवि अण्णओ व खु कव्वपरिस्समाभिण्णो ।

सूत्रधारः—अगोचरः खल्वयं पृथग्जनस्य । कुतः ।

नासाग्राहितलोचनो नियमिताशेषेंद्रियोपप्लवो
निःसंबाधविविक्तवासनिरतो ध्यानैकतानः कविः ।
यत्स्यात्मन्यपरोपदेशविषयं वस्त्वंतरं केवलं
स्वेनांतःकरणेन पश्यति सुखी तत्केन वा ज्ञायते ॥ ३ ॥

किंच—

अनाडत्य श्रुत्या चलयति शिरः कञ्चन शनै-
र्विजिह्माक्षः पश्यन् विहसति च पार्श्वस्थमपरः ।
प्रसादं सूक्तीनामकृतसुकृतः कृत्रिमबुधः
किमीष्टे नियेष्टुं दुरधिगमभावा हि कवयः ॥ ४ ॥

नटी—अज्ज सुहु भणिअं ।

सूत्रधारः—आर्ये तदिदानीं रंगप्रसाधनहेतोरिममेव मकरकेतनकीर्ति-प्रसरसुकुमारचंद्रिकाभिरामं मलयपवनाशिथिलितविरहिजनधैर्यग्रंथिं मदनमागधमधुपगानावमानितमानिनिमानग्रहमभ्यग्रविकसत्सहकारकोरक-शिखापरिपूरितकुसुमशरशरधिरंध्रं संवर्धमानोत्कलिकासहस्रमज्जत्कामिलोकं वर्तमानरमणीयं वसंतसमयमधिकृत्य गीयतां तावत् ।

नटी—अज्ज तहा । (गायति)

वासंतिएहिं बहु महु,–धाराणिस्संदबिंदुसिसिरेहिं ।
मंदाणिलेहिं रुणा होसंदि दिवो ससिसणाहो ॥ ५ ॥

सूत्रधारः—आर्य सुष्ठु गीतं । विहरति चक्रवाकमिथुनं सुखेन पुलिनां कणेषु सरसो रमयति पद्मिनीषु रमणीं सलीलमिह राजहंसरसिकः । मधुस-

१ कविजना वा खलु काव्यपरिश्रमाभिज्ञाः । २ आर्य सुष्ठु भणितम् । ३ आर्य तथा । ४ वासंतिकैर्बहु मधुधारानिष्पन्नबिंदुशिशिरैः । मंदानिलैराच्छादिता भविष्यंति दिवः शशिसनाथाः ।

मयावतारमणीयमेतद्धुना मनांसि हरति प्रमदवनं विकासिसुकुमारचूतकलिकाकलापसुभगम् ।

नटी—अज्ज सुट्ठु भणिअं । अज्ज हि—

सो अइरा आरामो कअसोहअंव मधुरससुहाए ।
सीदाए एदाए ओतिण्णवसंतलच्छीए ॥ ६ ॥

(नेपथ्ये)

साधु अवितथवादिनी भूयाः ।

नटी—(श्रुत्वा सविस्मयं) अंत्थ किं एयं ।

सूत्रधारः—आर्ये एष खलु दाशरथिर्मिथिलेश्वरतनयापरिणयनौपयिकमन्विच्छन्नार्यानिगदितं साधुकारेण प्रतीच्छति ।

नटी—अज्ज किंवा तस्स अप्पणो अत्थे मए मन्तिअं ।

सूत्रधारः—आर्ये त्वया तावत् सोऽचिरात् आरामः कृतशोभनयेव मधुरससुखया सीतया अवतीर्णवसंतलक्ष्म्या इति निगदितं । अनेन पुनः सः अपि राजा रामः कृतशोभ एव मधुरससुखया सीतया एतया अवतीर्णवसंतलक्ष्म्या इति गृहीतं ।

नटी—(सविस्मयं) जुंजइ अहो उभअस्सवि अत्थस्स सद्दाणं अविसंवादो ।

सूत्रधारः—आर्ये इतस्तावदावां नेपथ्यशेषे प्रोत्सहावहे ।

नटी—जं अज्जो आणवेदि ।

(इति निष्क्रांतौ) **इति प्रस्तावना ।**

---

१ आर्ये सुष्ठु भणितं । अद्य हि—सः अचिरात् आरामः कृतशोभयेव मधुरससुखया । सीतया एतया अवतीर्णवसंतलक्ष्म्या २ अत्र किमेतत् । ३ आर्ये किं वा तस्यात्मनोऽर्थे मया मंत्रितं । ४ युज्यते अहो उभयस्यापि अर्थस्य शब्दानामपिसंवादः । ५ यदार्यः आज्ञापयति ।

प्रथमोऽङ्कः ।

(ततः प्रविशति हृष्टो रामः)

रामः—अद्य खलु निर्विकल्पं संपूर्णकल्पा नः संकल्पाः । कुतः ।

उपनमति मनोरथास्पदं सपदि फलं सुलभेतरं च तत् ।
श्रुतिपथसुखमित्थमुत्थितं यदसुलभश्रवणं वचः श्रुतं ॥ ७ ॥

इयं च पुनरिदानीमलब्धदर्शनोत्सवानामप्यस्माकं वैदेहीसमागमाय समुचितदृष्टांतप्रत्ययात् प्रत्याशा प्रादुरभूत् । यथा—

दूरस्थमेतन्मिथुनं यदिष्ट्या
समानमिष्यत्यचिरादवश्यम् ।
मिथः पृथग्भूतमिदं यथैव-
मर्थद्वयं संघटमानमास्ते ॥ ८ ॥

(सहासं) केयं कामिनः शैली । यदसौ—

श्रुतं यद्वा तद्वा नयति मदनोद्दीपनपदे
प्रकृत्या यच्चित्तं गणयति च तत्तापजननम् ।
यदेवादौ वांछेत्तदनु तदपि द्वेष्टि सहसा
कथं पार्श्वग्राहो न हसति जनः कामुकजनम् ॥ ९ ॥

किंचान्यत्—

संतापानां कांतानिबंधनं यैव दुर्निवाराणाम् ।
तामेव किलान्विच्छति तेषामिच्छन् प्रतीकारम् ॥ १० ॥

(सस्मितं) इत्थं कामिजनमुपालंभमानाः स्वयमपि तत एव निर्वृत्तिमलभमाना वयमेवात्रोदाहरणं । मा तावद्धीः अनीदृशि खल्वहमुपहासभूमिः प्रेक्षावतां । कुतः—

---

१ निःसंशयं । २ मनोरथाः । ३ जनयति । ४ समीपस्थः ।

वैदेही सकृदप्यसौ मम दृशोर्नैवाभवत्संनिधौ
विस्रंभः क्व च नैव तिष्ठतु मिथः का संकथायाः कथा ।
सा चास्मिन्मिथिलापुरे वयमितः पूर्वं त्वयोध्यापुरे
श्रुत्वैव स्मरगोचरे विनिपतेत्को नाम मत्तः परः ॥ ११ ॥

इदं च पुनरिहात्याहितं ।

अस्मादृशं दुर्लभदर्शनाया–
मुत्कंठमानो जनकात्मजायाम् ।
मानोपरोधादसमीक्ष्यकारि
कथं न जिह्रेम्यहमात्मनोपि ॥ १२ ॥

(विचिंत्य) अलममुना शोचनीयेन ममाद्वितीयस्य मनोत्कंठासुलभेन संजल्पेन । येनैव सह सीतासंदर्शनोपायं विमृश्यनेनं संतापभरं लघूकरोमि । स चेदिदानीं चिरायति वयस्यगार्ग्यायणः ।

(ततः प्रविशति विदूषकः)

विदूषकः–दाणिं खु मे सुलहदंसणिज्जदाए अओज्झाउरिए एअं मिहिलाउरिं पेक्खंतस्स णअणाणं णिव्वदी जादा । विसेसदो उण दाणिं वसंतूसवसमाअमकुसुमिदुज्जाणदंसणकोदुएण मदणाराहणकोदूहलेण पुप्फावचयकंखाए जलकेलिदोहलेण वसंतदोलारोहणसमूसूअदाए पढममउ-

१ संभावणस्य । २ इदानीं खलु मे सुलभदर्शनीयतया अयोध्यापुर्याः एनां मिथिलापुरीं पश्यतः नयनानां निर्वृत्तिर्जाता । विशेषतः पुनरिदानीं वसंतोत्सवसमागमकुसुमितोद्यानदर्शनकौतुकेन मदनाराधनकुतूहलेन पुष्पावचयकांक्षया जलकेलिदोहलेन वसंतदोलारोहणसमुत्सुकतया प्रथममुकुलितस्वहस्तसंवर्धितप्रमदवनद्रुमसंभावनसत्वरतया च गृहीतसुकुमारवासंतिकवेषेण इतस्ततः सविभ्रमं परिभ्रमता स्त्रीलोकेन सह संचारिणा च प्रेक्षकजनेन निरतिशयां शोभामुद्वहति मिथिलापुरी । एवं च पुनर्नयनचापल्यात् गोपालकुलमार्गेणैव परिभ्रमता मया वयस्यो विनिसृतः एतावतीं पुनः वेलं मामपश्यन् अपरिचितदेशसुलभया तंद्रया मन्ये मयि समन्युस्तिष्ठति । तस्मात्त्वरयास्यमेव यास्यामि ।

लिअसहत्थसंवड्ढिअपमदवणदुमसंभावणसत्तुरदाए अ गाहिअसोमारवासंति-अवेसेण इदो तदो सविब्भमं परिब्भमन्तेण हत्थिआलोएण सह संचारिणा अ पेक्खअजणेण णिरंदिसअं सोहं उव्वहइ मिहिलाउरी। एवं च पुणो णआण-चावलादो गोवालउलमग्गेण विअ परिब्भमतेण मए वअस्सो विणिसरिदो एत्तिअं पुण वेलं मं अदक्खंतो अपरिचिददेससुलहाए तंदिए मण्णे मयि समण्णू चिट्ठइ। ता जाव वअस्सं एव समासिदेमि। (परिक्रम्यावलोक्य च) ऐसो खु वअस्सो असहाओ जं एवं मं पडिवालंतो चिट्ठइ जाव उपसप्पेमि। (उपसृत्य) जेदु पिअवअस्सो।

रामः—(दृष्ट्वा सादरं) अहो अस्य भक्तोपालम्भोचितः कालस्य स्मृतिपथे वयमतिवर्तिष्महि।

विदूषकः—मा खु मं तुमं असूएहि। अहं खु मिहिलाउरि वसंतुसवसि-रिदंसणेण विम्महिओ तुए विणा तं पेक्खिदुं अक्खमो इदो आहिंडिओ।

रामः—तेन हि वसंतोत्सवसंवर्धितविभवां मिथिलापुरीमवलोकयंतो वयमपि विलोचने विलोभयामः।

विदूषकः—तेण हि गच्छामः।

रामः—गच्छामतः।

विदूषकः—इदो।

(उभौ परिक्रमतः)

विदूषकः—(पुरो निर्दिश्य) वअस्स पेक्ख एसो खु सुहसमंचरंत-

---

१ एष खलु वयस्योऽसहाय यदेवं मां प्रतिपालयन् तिष्ठति यावदुपसर्पामि,। २ जयतु प्रियवयस्यः। ३ सतिरस्कारं। ४ मा खलु मां त्वमसूययाहं खलु मिथिलापुरि वसंतोत्सवश्रीदर्शनेन विस्मितः त्वया विना तां प्रेक्षितुमक्षमः इत आगतः। ५ तेन हि गच्छामः। ६ इतः। ७ वयस्य पश्य एष खलु सुखसमुच्चल-च्चंचरीकनिनदप्रणर्तितपरः मयूरः सुदूरापतत्सुरभिपरिमलः पिष्टातकचूर्णवर्णक-चित्रितगगनभित्तिकः। सुमधुरश्रूयमाणमधुपखलप्रणिकाजनगीतपेशलो युवजनधैर्य-स्खलीकरणकवाटको वेशवाटकः।

चंचरीअणिणदपणज्जअपर मइउरो सुदूरावडंतसुरहिपरिमलो पिट्ठादय-चुण्णवण्णअचित्तिअमअणभित्तिओ सुमहुरसुणिज्जंतमहुपअखिलज्जंतगणि-आजणगीअपेसलो जुवजणधीरखिलीकरणकवाडओ वेसवाडओ ।

रामः—वयस्य सम्यगुपलक्षितम् ।

आपादयंतो रतिलंपटानां
दूरागतीं [illegible]
विलासिनीमाल्यविलेपगंधैः
स्त्यायंति सायंतनगंधवाहाः ॥ १३ ॥

(अग्रतोऽवलोक्य)

प्रत्यंगोद्भिद्यमानस्तनमुकुलकृतप्राभृताभ्यर्थरोभि-
र्दंतोन्मेषोपहारैः प्रहसितवदनैर्लालनीयैर्वचोभिः ।
विभ्रांतोत्फुल्लनेत्रा ललितभुजलतामंदविक्षेपलीलाः
कंदर्पं दर्पयंत्यो भृशमिह गणिका दारिकाः संचरंति ॥ १४॥

विदूषकः—वेअस्स पेक्ख एत्थ महामदविब्भमवेसवहूणं ।

रामः—(निर्वर्ण्य)

अंसोपांतविलंबिकेशरचनास्विद्यत्कपोलास्फुर—
द्बिंबोष्ठ्यो मधुपानमंथरपदन्यासस्खलन्नूपुराः ।
व्याकीर्णालकवासचूर्णकलुषा व्याघूर्णमानेक्षणा
लीना वृत्यरसेन वेशवनिता रथ्यामलंकुर्वते ॥ १५ ॥

(नेपथ्ये)

एषा खलु भर्तृदारिका सीता कामदेवायतनपर्यंतोपवनदोलागृहे वसंतदोलारोहणोपहारेण वसंतमाराधयितुमागमिष्यति । तदिदानीं ।

इतस्तावत्सर्वाः परिजनवृता वेशवनिता
वसंतार्हाहार्यद्विगुणितवसंतोत्सवगुणाः ।

---

१ वयस्य पश्यात्र महामदविभ्रमवेशवधूनाम् ।

मरुन्मन्दाक्षेपोल्लसितमकरांकध्वजपटं
मनोज्ञेदस्थानं विशति रतिनाथस्य भवनम् ॥ १६ ॥

किं च ।

मृदंगं वाद्यंतां मधुरमिदमार्दंगिकजनै—
र्ध्रुवं गेयं गेयं श्रवणसुभगं गातृभिरपि ।
सलीलं नर्त्तक्यो विरचयत संगीतरचनां
कृतप्रेक्षोत्सुक्यो भवतु विदुसाभाजिकजनः ॥ १७ ॥

रामः—(श्रुत्वा सहर्षं) वयस्य कामदेवभवनपर्यंते वसंतदोलारोहणं करिष्यति विदेहेश्वरदुहितेत्युद्घोष्यते तदिदानीं तस्यैव मार्गमादर्शय येनाहं मैथिलीदर्शनेन चक्षुषी सफलीकरोमि ।

विदूषकः—जं भवं आणवेदि । इदो इदो

(उभौ परिक्रामतः)

रामः— (सोत्कंठं)

प्रारंभाभिमुखे पयोदसमये या चातकस्योक्तता
शीतांशौ निषधाचलांतिकगते हर्षश्चकोरस्य यः ।
आश्वासो मधुपस्य चूतविटपे यो निष्कलत्कोरके
सीतादर्शनसन्निकर्षजनिता तादृग्ममासौ धृतिः ॥ १८॥

विदूषकः—वैअस्स वरं कामदेवं वरअ ।

रामः—(निर्वर्ण्य) अहो निरतिशया लक्ष्मीः । इह हि—

वामेनाप्रवर्तीनचीनवसनश्लिष्यत्तुलाकोटिना
श्लिष्टार्द्धौरुकबद्धलक्ष्यवपुषा वामेतरेणांघ्रिणा ।
आमृष्टस्तनपत्रभंगकपिशैः संव्यानकौशेयकैः
संवृण्वंति समंततस्तु वदना धैर्या यशः कामिनाम् ॥ १९ ॥

---

१ यद्भवानाज्ञापयति । इतः इतः । २ वयस्य वरं कामदेवं वरय ।

(अन्यतोऽवलोक्य) अहो भावानामपि रसांतरमास्कंधमाप्रेडितानि विलसितानि । तथाहि ।

इयं व्रीडा व्रीडामनुभवति रम्यां मृगदृशा-
मुदग्रामुत्कंठां भजति पुनरुत्कंठितमपि ।
स्वयं लीला लीलांतरमुपगता माद्यति मदो
विलासैर्विभ्रांतं भवति मदनो जातमदनः ॥ २० ॥

(नेपथ्ये)

वसत्थेह

विदूषकः—वंअस्स ओसरणसद्दो सुणिअदि मण्णे आअच्छदि तत्त-होदी सीदा । किं अत्थ काअव्वं ।

रामः—(विलोक्य) वयस्य एष इदानीं कृतमकरध्वजपूजोपस्थानो दोलागृहाभिमुखो निर्गच्छति वारविलासिनीजनः तदनुपलक्षिता एव वयं विविक्ते कामदेवगृहाभ्यंतरे स्थास्यामः ।

विदूषकः—एंव्वं करेह्म ।

(तथा कुरुतः)

(ततः प्रविशति सपरिवारा सीता विनीता च)

विनीताः—इदो इदो भट्टिदारिआ ।

(सर्वाः परिक्रामंति)

विनीता—(पुरो निर्दिश्य) एअं खु कअपुप्फोपहारालंकारं रअणचु-ण्णणिव्वत्तिअवसंतपूआसमुदायारं समंतदो सज्जीकअं दोलाघरअं जाव प-विसदु भट्टिदारिआ ।

---

१ अपसरत । २ वयस्य अपसरणशब्दः श्रूयते मन्ये आगच्छति तत्रभवती सीता किमत्र कर्तव्यं । ३ एवं कुर्मः । ४. इत इतः भर्तृदारिका । ५ एतत्खलु कृतपुष्पोपहारालंकारं रत्नचूर्णनिर्वर्तितवसंतपूजासमुदायारं समंततः सज्जीकृतं दोलागृहं यावत् प्रविशतु भर्तृदारिका ।

सीता—जं पिअसही भणादि ।

(सर्वाः प्रविशंति)

विनीता—(दोलां हस्तेन गृहीत्वा) एसा तुमं पडिवालेइ रअणदोला जाव आरोहदु भट्टिदारिआ ।

सीता—सहि तेण हि आरुहेमि देहि मे हत्थावलंबं ।

विनीता—जं भट्टिदारिआ आणवेदि । (तथा करोति)

सीता—(दोलामधिरोहति) विनीता—(आकर्षणरज्जुमाक्षिपति) ।

सीता—सहिओ जाव गाअम्म ।

सख्यः—जं पिअसही भणादि ।

(सर्वाः गायंति)

दंसणसमूसुओ संपइ पिअं पिआदंसिदसमाअमो पावइ खु कोदुअं ।

रामः—वयस्य दोलागृहमुपागता न वा जानकीति कथं जानीमः ।

विदूषकः—इदो ओसरिअ अमुणा पक्खदुवारेण हं पेक्खेमि । (तथा कृत्वा) आरूढायेव तत्तहोदी दोलं ।

रामः—(सहर्षः) तेन हि सफलप्रयत्नाः स्मः । (उपसृत्य विलोक्य च सोत्कंठं)

उत्कंठानां बीजं मनोरथानां परिश्रमस्थानम् ।
हृदयस्य समुच्छ्वसितं तदिदं मम सपदि सन्निहितम् ॥२१॥

विदूषकः—एसो सअं चेअ देवी लच्छित्ति समत्थेमि ।

---

१ यत्प्रियसखी भणति । २ एषा त्वां प्रतिपालयति रत्नदोला यावदारोहतु भर्तृदारिका । ३ सखि तेन हि आरोहामि देहि मे हस्तावलंबनं । ४ यद्भर्तृदारिका आज्ञापयति । ५ सख्यः यावद्गायामः । ६ यत्प्रियसखी भणति । ७ दर्शनसमुत्सुकः संप्रति प्रियां प्रियदर्शितसमागमः प्राप्नोति खलु कौतुकः । ८ इतोवसृत्यामुना पक्षद्वारेणाहं पश्यामि । ९ आरूढैव तत्रभवती दोलाम् । १० एषा स्वयं चैव देवी लक्ष्मीति समर्थयामि ।

रामः-(निर्वर्ण्य) अहो रूपानुरूपं वयः वयोनुरूपं लीला लीलानुरूपो विभ्रमो विभ्रमानुरूपं सौष्ठवं । किंच ।

स्वयं सौंदर्यसर्वस्वमसाधारणसुंदरम् ।
अनया लब्धतादात्म्यमात्मानं श्लाघते ध्रुवं ॥ २२ ॥

विनीता—भट्टेदारिए जइ वसंतदोलारोहणं संमानिदुं इच्छसि तदो तुमं वि गाएहि ।

सीता—हंला किं मं अतिमेत्तपसंसाए लहू करेसि । होदु ण दाव पिअसहिवअणं लंघेमि दस्सणसमुस्सु (इतिपूर्वोक्तमेव गायति) ।

रामः-(श्रुत्वा सहर्षं स्वगतं) हंत मामिवोद्दिश्येदमुक्तं (प्रकाशं) अये इयमनवद्यवेषानुसरणसरसामंदनिष्यंदमानमधुरसहितानुरागकंदलितकंदर्पकेलिर्वसंतविभ्रमभूषा कांभोजिभाषा (निर्वर्ण्य) अहो आभिजात्यं गीतस्य । पश्य ।

सालंकारमनिष्ठुराक्षरपदं प्रव्यक्तवर्णक्रमं
पूर्णांगं सलयं कलानियमितं प्रस्पष्टतानश्रुतिः ।
तत्कालोचितगेयवस्तुरचितां प्रासादकिं च ध्रुवा-
माश्रित्यैव हि गीतमेतदधुना गीतं सुकंठ्यानया ॥ २३ ॥

अतिमात्रं च सा प्रसाधिता दोलारोहणेन । अस्या हि ।

मृदुतररणत्कांचीदाम क्वणन्मणिनूपुरं
निकषदलकप्रांतक्लाम्यद्विशेषकवर्णकम् ।
शिथिलकवरीबंधं स्विद्यत्कपोलतलं वपुः
श्रियमपि परां दोलारोहच्छलादधिरोहति ॥ २४ ॥

---

१. भर्तृदारिके यदि वसंतदोलारोहणं संमानयितुमिच्छसि ततस्त्वमपि गायस्व । २ हे सखि किं मामतिमात्रप्रशंसया लघूकरोषि । भवतु न तावत् प्रियसखिवचनं लंघयामि, दर्शनसमुत्सुकः ।

विनीता—सव्वं एदं सोहणं वसंतदोलारोहणं आरुहंतो स पिओ एव्व केवलं ण दिस्सई ।

सख्यः—हैला सुट्ठु भणिअं ।

सीता—(लज्जां नाटयंती स्वगतं) दुल्लहो खु सो कालो जस्सिं पिओ जणो दस्सणपहं पावदि जदो सवणेकगोअरे अयोज्झाउरिए तम्हि जणे चिरपरूढकोऊहलदुल्ललिअं एअं मे हिअअं ।

विनीता—एवं च पुण अहं तक्केमि एदेण सोहणेण वसंतदोलारोहणेण समाराहिओ अइरेण इमिए दंसेदि पिअं वसंतोत्ति ।

सख्यः—सँहि एवं ।

रामः—अहो वस्त्वन्तरसमवेता अपि गुणा युगपन्मयि संक्रामंति । अस्या हि—

नेत्राभ्यां सह विभ्रमव्यतिकरं मध्येन साकैकभं
हारेण स्खलितं सहैव भजते कंपं कुचाभ्यां सह ।
स्रस्तं सामि सहस्तनांशुकदशाप्रांतेन चाकृष्यते
चित्रं संप्रति दोलया सह पुनर्दोलायते मे मनः ॥ २५ ॥

विनीता—(आकर्ण रज्जुमाक्षिपंती उच्चैर्गायति)

जा आरुहइ दोलं कंतेणवि वसंते ।
सीसंमि खु जुवईणं सा जोव्वणवईणं ॥ २६ ॥

---

१ सर्वमेतत् शोभनं वसंतदोलारोहणं आरोहतः स प्रिय एव केवलं न दृश्यते । २ सखि सुष्ठु भणितं । ३ दुर्लभः खलु स कालो यस्मिन् प्रियो जनो दर्शनपथं प्राप्नोति यतः श्रवणैकगोचरेऽयोध्यापुर्यां तस्मिन् जने चिरप्ररूढकुतूहलदुर्ललितं एतन्मे हृदयं । ४ एवं च पुनरहं तर्कयामि एतेन शोभनेन वसंतदोलारोहणेन समाराधितेऽचिरेणैतस्याः दर्शयति प्रियं वसंत इति । ५ सखि एवं । ६ या आरोहति दोलां कांतेनापि वसंते शीर्षे खलु युवतीनां सा यौवनवतीनां ।

सीता—(सविषादमात्मगतं) अयं उण जणो सुदूरुक्कंठदाए अकअदारिसभागधेओ ।

विनीता—भट्टदारिए किं तुमं ण हि गाअसि जाव गाएहि ।

सीता—हंजे अलं एत्तिएण दोलारोहणेण किलम्मंति खु मे अंगाइं ।

विनीता—(विनिरूप्य आत्मगतं) मण्णे एसा अहिगअगंजिअत्था अप्पाणं अतहहूयं मण्णंती खिज्जइ । ता अत्थि किंवि इमाए एअंते ठिदं । (प्रकाशं) तेण हि मं ओलंबिअ अवरुहेहि ।

सीता—जं पिअसहि भणादि (अवरुह्य) हंला एहि गच्छम्म ।

विनीता—हंदो ।

(सर्वाः परिक्रामंति)

विनीता—(अपवार्य) भट्टिदारिए एहि कामदेवघरअं पविसिअ अब्भत्थेमो तुह उक्कंठिअं ।

सीता—(साशंकमपवार्य) किं मेए उक्कंठिअं ।

विनीता—(अपवार्य) किं मैहावि पच्छादिअदि ।

सीता—(आत्मगतं) कहं गहिअभावम्हि पिअसहिए । (अपवार्य) सेहि कहं तुह पच्छदेमि । जइ अहं अप्पणा पच्छादेमि तदा खु तुह पच्छादेमि ।

---

१ अयं पुनर्जनः सुदूरोत्कंठतया अकृततादृशभागधेयः । २ भर्तृदारिके किं त्वं न हि गायसि यावद्गायस्व । ३ सखि अल्पमेतावद्दोलारोहणेन क्लाम्यंति खलु मेंगानि । ४ मन्ये एषाधिगतगीतार्थात्मानमतथाभूतं मन्यमाना खिद्यति । तस्मादस्ति किमपि एतस्या एकांते स्थितं । ५ तेन हि मामवलंब्यावरोहतु । ६ यत्प्रियसखी भणति । ७ सखि एहि गच्छावः । ८ इतः । ९ भर्तृदारिके एहि कामदेवगृहं प्रविश्यार्थयामस्तवोत्कंठितं । १० किं मयोत्कंठितं । ११ किं ममापि प्रच्छाद्यते । १२ कथं गृहीतभावास्मि प्रियसख्या । १३ सखि कथं तव प्रच्छादयामि यदि अहं आत्मनः प्रच्छादयामि तदा खलु तव प्रच्छादयामि ।

विनीता—सहिओ गच्छम्ह दाव कण्णअभवणं ता पुप्फावचअचाव-लादो परिब्भमदि सव्वं पिअसहिअणं गदुअ सद्दावेद ।

सख्य—जं पिअसहि भणादि ।

विनीता—भट्टिदारिए ओसरिदो सहिअणो जाव पुणो एसा पच्छा-गमिस्सदि ताव कामदेवं अब्भत्थेमो ।

सीता—तह

(परिक्रामतः)

विनीता—एदं कामदेवघरअं जाव पविसेम ।

(उभे प्रविशतः)

विदूषकः—वअस्स कहं इदं एव्व पविसंति ता मं बम्हणं पेक्खिअ तदाअहिवाहेइ परिअण्णो जाव अहं अण्णदो गच्छेमि । (निष्क्रांतः)

विनीता—(रामं दृष्ट्वा सविस्मयं) अहो को एसो ।

सीता—(दृष्ट्वा सलज्जम्) अहो एसो खु देओ मअणो ।

विनीता—भट्टिदारिए दिट्ठिआ सो खु देवो पसण्णो ससरीरो एव्व चिट्ठइ अग्गदो अणंगो । ता इस्स दे उक्कंठं विण्णवेमो ।

सीता—(सलज्जमंजलिं बध्नाति)

विनीता—भअवं ससरीरमम्मह एअं मे पिअसहिं अणुरूवेण भत्तुणा जोजेहि

---

१ सख्यः गच्छामः तावत्कन्यकाभवनं तस्मात्पुष्पावचयचापल्यतःपरिभ्रमति । सर्वं प्रियसखिजनं गत्वा शब्दायते । २ यत्प्रियसखी भणति । ३ भर्तृदारिके ऽपसृतः सखीजनः यावत्पुनरेष प्रत्यागमिष्यति तावत्कामदेवमभ्यर्थयामः । ४ तथा । ५ एतत्कामदेवगृहं यावत्प्रविशामः । ६ वयस्य कथमिदमेव प्रविशति तस्मान्मां ब्राह्मणं प्रेक्ष्य तदातिवाहयति परिजनो यावदहमन्यतो गच्छामि । ७ अहो क एषः । ८ अहो एष खलु स मदनः ९ भर्तृदारिके दिष्ट्या स खलु देवः प्रसन्नः सशरीर एव तिष्ठति अग्रतोऽनंगः । तस्मादस्य ते उत्कंठां विज्ञापयामः । १० भगवन् सशरीरमन्मथ एतां मे प्रियसखीमनुरूपेण भर्त्रा योजय ।

रामः—(सस्मितं सीतां प्रति) अयि सुंदरि ।

श्रुत्वैव त्वां भजति पदवीं यो दृढोत्कंठितानां
दृष्ट्वा भूयो न भजति धृतिं यः सदा त्वामपश्यन् ।
इत्थं चाद्यप्रणतशिरसा प्रार्थ्यते यो भवत्या
संप्राप्य त्वं कृतिनमचिरात् कामिनं तं रमेथाः ॥ २७ ॥

विनीता— (आत्मगतं) भावंतरगब्भिअं विअ से वअणं ण एस केवलं मम्महत्तेण वट्टइ । (निरूप्य अपवार्य) भट्टिदारिए रामक्खरलच्छिअ-अंगुलिमुद्दिआ इमस्स हत्थे दिस्सइ सुदं च मए आअण्णो मिहिलिम्हि दास-रहीं रामोत्ति ।

सीता— (सहर्षात्मगतं) अम्हो एसो खु सो रामो जो मए सुणिज्जएव पुव्वं उक्कंठं जणेदि दाणिं खंडिएत्था मे उक्कंठा ।

विनीता—(अपवार्य) भट्टिदारिए वंचिआ खु सवेह इमस्स रूव-सोहग्गेण ।

(नेपथ्ये ।)

इंदो इदो ।

विनीता—(कर्णं दत्वा) भट्टिदारिए समासण्णो सहिअणालाओ ताव गच्छम्म ।

सीता—(रामं प्रति) हंजौ अम्हे दाणिं किं पुच्छेमो ।

रामः—पुनर्दर्शनाय ।

सीता—अज्ज इमे भाअदेआ ।

---

१ भावांतरगर्भितमिवास्य वचनं न एष केवलं मन्मथत्वेन वर्तते । २ भर्तृदारिके रामाक्षरलांछितांगुलिमुद्रिकास्य हस्ते दृश्यते श्रुतं च मयागतो मिथिलायां दाशरथी राम इति । ३ अहो एष खलु स रामो यो मया शृण्वतैव पूर्वमुत्कंठां जनयति इदानीं खंडितार्था मे उत्कंठा । ४ भर्तृदारिके वंचिता खलु क्षमस्वास्य रूपसौ-भाग्येन । ५ इत इतः । ६ भर्तृदारिके समासन्नः सखिजनालापः तावद्गच्छामः । ७ सखि वयमिदानीं किं पृच्छामः । ८ आर्ये इमानि भागधेयानि ।

विनीता—इदो इदो भट्टिदारिआ ।

(परिक्रम्य निष्क्रांता सीता विनीता च)

रामः—(सोत्कंठं) कथमेकपद एव वयमवस्थांतरमारोपिताः सीतया । तथा हि—

विचलितमणिहारं किंचिदानम्रमध्यं
क्वणितवलयमीषद्भ्रष्टसीमंतलेखम् ।
अलसनयनमर्धन्यस्तकर्णावतंसं
युगपदुरसि बद्धं मन्मनश्चांजलिश्च ॥ २८ ॥

किंच—

नीवीमुच्छ्वसितां मया सह मनाक् संलप्य नाभिह्रदां
दोलारोहणविश्लथां रचयितुं व्यापारयंत्या करम् ।
उत्कंपात्तरलोरुचारुचरणन्यासं व्रजंत्या तया
कामिन्या ननु कामबंधभवनात्कामार्थ चास्म्यर्पितः ॥ २९ ॥

(नेपथ्ये)

इदो इदो पिअवअस्सो

रामः—कथमाह्वयति वयस्यः ।

(परिक्रम्य निष्क्रांतः)

इति श्री भट्टगोविंदस्वामिनः सूनुना हस्तिमल्लेन विरचिते मैथिलीकल्याणनाम नाटके प्रथमोऽङ्कः ॥ १ ॥

---

१ इत इतो भर्तृदारिके । २ इत इतः प्रियवयस्यः ।

द्वितीयोऽङ्कः ॥ २ ॥



(ततः प्रविशति विदूषकः)

विदूषकः—पुव्वं ताव अयोज्झाउरीं पहुदि तत्तहोदिं मिहिलेसरस्स पिअदुहिअरं सुण्णंतो एव्व सुदद्दाणरज्जो विअ बम्हणो बलिअं उक्कंठिओ पिअवअस्सो । इदो पुण जदा दोलाघरए दिट्ठा तत्तहोदी सीता तदो आरभिअ अण्णारिसहिअओ चिंतोवराअकलुसिअणअणो ण सअणे णिव्वुदिं लहेइ ण णिसासु णिद्दं पडिवज्जइ केवलं तं चेअ ज्झेउं पारेदि । मं पुण सीआविहारुद्देसदस्सणत्थं तहिं तहिं पेसंतो खणमेत्तंवि अप्पणो पासे विस्सद्धं ठादुं ण सहइ, अहं च पुण पणट्ठपहो विअ वच्छो इदो तदो सीअं अण्णेसंतो किअपरीभमो अप्पाणं केवलं आआसोमि । एसा पुण सीदा दुस्साहिअ विअ देवदा ण कदाइ सण्णिहिं पडिवज्जइ (सनिर्वेदं) एवं च अणिवत्तिअमित्तजणोइदसक्कारदाए बन्धुसोहत्थो णिव्विण्णो दाणिं अहं पिअवअस्सं दट्ठुं तहवि सिणेहपरिहीणो ण तेण विणा खणं पि वट्टिदुं खमे ता दाणिं वअस्सस्स चेव्व पासं गमिस्सं । (परिक्राम्यति)

---

१ पूर्वं तावदयोध्यापुरीं प्रभृति तत्रभवतीं मिथिलेश्वरस्य प्रियदुहितरं शृण्वन्नेव श्रुतदानराज्य इव ब्राह्मणो बलवदुत्कंठितो प्रियवयस्यः । इतः पुनर्यदा दोलागृहे दृष्ट्वा तत्रभवतीं सीतां तत आरभ्य अन्यादृशहृदयः चिंतोपराग-कलुषितनयनो न शयने निर्वृतिं लभते न निशासु निद्रां प्रतिपद्यते केवलं तामेव ध्यातुं पारयति । मां पुनः सीताविहारोद्देशदर्शनार्थं तस्मिन् तस्मिन् प्रेषयन् क्षणमात्रमप्यात्मनः पार्श्वे विस्रब्धं स्थातुं न सहते अहं च पुनः प्रणष्टपट इव वत्स इतस्ततः सीतामन्वेषन् कृतपरिश्रम आत्मानं केवलमायासयामि । एषा पुनः सीता दुस्साधिता इव देवता न कदापि संनिधिं प्रतिपद्यते । एवं चानिवर्तितमित्रजनो-चितसत्कारतया बन्धुसौहार्दनिर्विण्ण इदानीमहं प्रियवयस्यं द्रष्टुं तथापि स्नेह-पराधीनो न तेन विना क्षणमपि वर्तितुं क्षम तस्माद्दानीं वयस्यस्यैव पार्श्वं गमिष्ये।

(ततः प्रविशति सोत्कंठो रामः)

रामः—

उत्कंठितं हृदि यदात्मनि गोपयंत्या
तद्धीतिताविव तया करसंघटेन ।
बद्धोंजलिः किमपरं कथयामि तस्मै
बद्धोंजलिर्निभृतमंजलये मयापि ॥ १ ॥

अयं च पुनरत्र मन्मथस्यावष्टंभः । यत् किल ।

सव्याजमर्थचलितानि निरीक्षितानि
स्रस्तस्तनांशुकदृशांतविकर्षणानि ।
आसक्तिसर्गमधुराणि सहैव संख्या-
मोघानि कान्यपि च मन्मथजल्पितानि ॥ २ ॥

(निःश्वस्य) अहो दुर्धरो मन्मथः । मम हि ।

अंगेष्वनंगस्य शराशरव्ये-
व्यापुंखमग्नास्सफलास्तुदंति ।
सीतार्थिनो मे विफलाश्च जाता
विश्वास्यमेषां न च सौमनस्यम् ॥ ३ ॥

न खल्वसौ सतां मनः प्रीणयति मनसिजस्य प्रवृत्तिः । (आकाशे लक्ष्यं बद्ध्वा)

असुलभफलप्रत्याशाभिः खलीकुरु नैव मां
घटय यदि वा त्वं कामिन्या तया रतिवल्लभ ।
त्रयमपि भवान् स्वीकुर्वन् कथं च न लज्जते
विघटितफलानन्नारंभा भवंति मनस्विनाम् ॥ ४ ॥

(विभाव्य) मा तावद्धीः अविषयप्रसक्तोऽयं परामर्शः । कुतः ।

असौ दग्धोऽनंगः प्रभवति कथं मां व्यथयितुं
न चासौ दुर्वीतप्रकृतिसुलभो यौवनमदः ।

उपालंभस्थानं न परमपि पश्यामि विमृशन्
स्वयं सीता सैव प्रसभमिह मामुत्सुकयति ॥ ५ ॥

विदूषकः— (पुरो विलोक्य) ऐसो सु पिअवअस्सो जाव उवसप्पामि। (उपसृत्य) जेदु पिअवअस्सो।

रामः—अशृण्वन् औत्सुक्यं खलु जनस्य सर्वथा पौरोभाग्याय। तथाहि-

कृत्यांतरविनिवृत्तः कविजन इव विजनमाश्रितो देशः।
अंतश्च किमपि जल्पन् बिभामि चिंतां विनम्रमुखः ॥ ६ ॥

विदूषकः—(आत्मगतं) कहं आमअंपि मं ण जाणइ अण्णचित्तो वअस्सो (पुनः एकान्तं) जेदु पिअवअस्सो।

रामः—(दृष्ट्वा) कथं वयस्य वयस्य उपविश्यतां।

विदूषकः—जं वअस्सो आणवेदि। (उपविशति)

रामः—वयस्य अपि संभाव्यते नस्समाश्वासः।

विदूषकः—एवं उच्छहंते मइ किं वा ण संभाविअदि।

रामः—(सादरं) कथय केदानीं द्रक्ष्यते सीता।

विदूषकः—झाणे।

रामः—किं तत्रापि भवानेव प्रार्थनीयः। पश्य।

तन्मया मम संकल्पास्तन्मयं मम चिंतितम्।
तन्मयानि ममाक्षाणि तन्मयं मम जीवितम् ॥ ७ ॥

विदूषकः—(सोत्रासं) अण्णं ण पेक्खामि अहं तुह आतंकठाणं।

रामः—यदि मदन्योसि तदा न पश्यसि वयस्य तिष्ठत्वेतत् किं भवानत्र मैथिलीं प्रति समर्थयते।

---

१. एष खलु प्रियवयस्यः यावदुपसर्पामि। २ जयतु प्रियवयस्यः। ३ कथमागतमपि मां न जानाति अन्यचित्तो वयस्यः। ४ जयतु प्रियवयस्यः। ५ यद्वयस्य आज्ञापयति। ६ एवमुत्सहमाने मयि किं वा न संभाव्यते। ७ ध्याने। ८ अन्यत्र पश्यामि अहं तवातंकस्थानम्।

विदूषकः—सुंणाहि दाव एअं समाहिअं[1] ।

रामः—समाहितमनसः स्मः ।

विदूषकः—सुंद एव्व दाव भवं कण्णपरंपराए समुसुएइ जुवइजणं किं पुण कामदेवभवणे तह दिट्ठो तह अ णाम संभाविदो[2] ।

रामः—तथैव हि भवतोक्तं[3] ।

विदूषकः—जेह अ मोहं परिणमिस्सदि[4] ।

राम—भवांस्तु कामं सूनृतवचनः । सा पुनरस्माकं दुर्लभदर्शना[5] ।

विदूषकः—कहं दुल्लहदस्सणा लद्धपुव्वं खु ताए दस्सणं[6] ।

रामः—

अपरिहृतविमर्दं संगमं न प्रतीक्ष्ये
प्रणयरसनिषिक्तं नैव संभाषितं च ।
यदि भवति ममासौ स्वैरमद्यापि दृश्या
किमिव मम कृतित्वे शिष्यतेऽन्विष्यते वा ॥ ८ ॥

विदूषकः—(सस्मितं) अद्धीयेव्व केवलं तत्तहोदिदस्सणे तुह किदत्थदाए अवसेसो[7] ।

रामः—किमिव ।

विदूषकः—तेह खु अहे उव्वाहसत्थिवाअणसक्कारं ण लंभिदो होमि[8] ।

रामः—(सस्मितं) तेन हि मम कृतित्वमवशिष्यत इति साधूक्तमविकलमेव कृतित्वमनवलीढमास्त इति ब्रूहि ।

---

१ शृणु तावदेतत् समाहितं । २ श्रुत एव तावद्भवान् कर्णपरंपरया समुत्सुकयति युवतिजनं किं पुनः कामदेवभवने तथा दृष्टः तथा च नाम संभावितः । ३ यदा मोहं परिणमिष्यति । ४ कथं दुर्लभदर्शना लब्धपूर्वं खलु तस्या दर्शनं । ५ अस्यैव केवलं तत्रभवतिदर्शने तव कृतार्थतया अवशेषः । ६ तथा खलु अहं उद्वाहस्वस्तिवाचकसत्कारं न लंभितो भवामि ।

विदूषकः—ऐव्वं एअं जह उव्वाहसत्थिवाअणोवहारसक्करेण समाराहिओ भविस्संत तह तुमपि अइरेण तत्तहोविपरिणअणकल्लाणं लहेहि ।

रामः—शिरसा भवितुमर्हामि ।

विदूषकः—पुव्वं करेण गहिस्सासि पुणो सिरेण ।

रामः—वयस्य साध्वीमिमामुर्क्तिं पश्य न तथा दयिता समन्मथा च तथा पातितमर्वं वीक्षितं मनसः परितोषणं यथा प्रियमित्रैः कथितं प्रियां प्रति ।

विदूषकः—अणाराहिअवअस्सस्स मारिसस्स जणस्स केवलं लज्जाए होदि पअत्तो ।

रामः—अलमुद्वेगेन । कुतः । अनवाप्तफलो यथा वयस्यः प्रियमित्रस्य कृते कृतप्रयत्नः विवृणोति सुहृत्त्वमत्युदारं न तथाऽवाप्तफलो विना प्रयत्नात् ।

विदूषकः—होदु एवं तहवि कहं विअ तुमं अप्पलहुअं एअं कालं अइवाहइस्सिसि ।

रामः—क्व नु खलु वयं दुरतिवाहमेनं कालमतिवाहयामः ।

विदूषकः—(विचारयन्) सो देसो तारिसो एसो देसो एरिसो (विभाव्य) अं वअस्स दिट्ठो खु तुह विणोदणजोग्गो पएसो ।

रामः—कथय ।

विदूषकः—अत्थि राजघरअस्स उत्तरदो माहविवणं णाम मणोविलोहणं उववणं तहिं दाव गच्छेमो ।

---

१ एवमेतद्यथोद्वाहस्वस्तिकोपहारसत्कारेण समाराधितो भविष्यामि तथा त्वमपि अचिरेण तत्रभवतीपरिणयनकल्याणं लभस्व । २ पूर्वं करेण गृहीष्यसि पुनः शिरसा । ३ अनाराधितवयस्यस्य मादृशस्य जनस्य केवलं लज्जायै भवति प्रयत्नः । ४ भवत्वेवं तथापि कथमिव त्वमल्पलघुकं एनं कालं अतिवाहयिष्यसि । ५ स देशस्तादृशः एष देश ईदृशः । ६ आ वयस्य दृष्टः खलु तव विनोदयोग्यः प्रदेशः । ७ अस्ति राजगृहस्योत्तरतः माधवीवनं नाम मनोविलोभनमुपवनं तस्मिन् तावद्गच्छावः ।

रामः— यद्वाह भवान् ।

विदूषकः—उट्ठेदु भवं ।

(उभावुत्तिष्ठतः)

रामः—वयस्य माधवीवनस्य मार्गमादेशय ।

विदूषकः—इदो इदो ।

(उभौ परिक्रामतः)

रामः— (सवैचित्र्यं कामदेवभवनं प्रति गच्छति)

विदूषकः—(पृष्ठतो विलोक्य) कहं अण्णादो पत्थिदो वअस्सो (उपसृत्य हस्ते गृहीत्वा) वअस्स ण खलु एसो माहविवणमग्गो एसो णं कामदेवघरअमग्गो ता इदो एहि ।

रामः—(पदान्तरं स्थित्वा) अहो ममास्थानाभिनिवेशिता । (आत्मानं प्रति)

य एवाविश्रान्तं मदनमृगतृष्णां मृगयते
स चापस्त्वज्ञेतो मृग मृगयया श्लाघितबलः ।
मदन्यस्तस्यैवं भवनमभियातुं प्रयतता—
मनुन्मत्तः को वा तदलमलमात्मानित इतः ॥ ९ ॥

अपरावर्तते ।

विदूषकः—इदो इदो ।

(परिक्रामतः)

विदूषकः—(पुरो निर्दिश्य) वअस्स एवं तं माहविवणं ।

रामः—यावत्प्रविशामः ।

(उभौ प्रविशतः)

रामः—(निर्वर्ण्य) अहो माधविवनस्य परा माधवी लक्ष्मीः । अत्र हि—

---

१ उत्तिष्ठतु भवान् । २ इत इतः । ३ कथमन्यतः प्रस्थितो वयस्यः । ४ वयस्य न खल्वेषो माधवीवनमार्गः एष ननु कामदेवगृहमार्गः तस्मादित एहि । ५ इत इतः । ६ वयस्य एतन्माधवीवनं ।

मलयपवनतुन्नं पल्लवं वेपमानं
वहति हृदयमंतर्मन्मथार्तो युवेव ।
विसृजति मधुबिंदुच्छद्मना [illegible]
पुलकित इव मुग्धैः कोरकैरेष चूतः ॥ १० ॥

अपि च ।

कुसुमरसकोदरगतं सरसं रागोपदंशमधु पीत्वा ।
मंथरगमना मधुरं गायंति मदोद्धताः मधुपाः ॥ ११ ॥

विदूषकः—एदं खु विआसुम्मुहकुसुममंजरिभरभरिअसहआरमहीरुहसिहरपब्भारं महुरसलालसपरिब्भमंत सुलहमहुअरं आजुहागारं विअ लक्खिज्जइ महुरवसिलीमुहरसिअस्स कुसुमाउहस्स ।

रामः—वयस्य सम्यगुपलक्षितं । इह हि ।

उत्कंठयंति मधुपान् कलिकास्तरूणा-
मुच्चिद्रयंति मुकुलानि बलाद्विरेफाः ।
उत्तंसयंति पवनाः सुमनःपरागा-
नुद्दीपयंति मदनं मरुतां विहाराः ॥ १२ ॥

(विचिंत्य) इदमिह संप्रधार्यं येनास्य मनोभवस्य ।

कोदंडं किल कोमला सुमनसस्ता एव चित्रं शरा-
स्तत्र ब्रूम शिलीमुखैरथ कथं जीवा गुणः कल्पितः ।
तद्विस्मृत्य सहामहे कथमिदं प्राज्ञैरनुज्ञायतां
यद्बुर्लक्ष्यमसुष्य वक्ति पृथिवीलक्ष्यं मनः कामिनाम् ॥ १३ ॥

विदूषकः—वँअस्स जस्स दे मअण एव्व ईरिसिए अवत्थाए कारणं सो तुमं चेअ तं मअणं उवहसंतो दाणिं उवहसणिज्जो ।

---

१ एतत्खलु विकाशोन्मुखमंजरिभरभरितसहकारमहीरुहशिखरप्राग्भारं मधुरसलालसपरिभ्रमत्सुलभमधुकरमायुधागारमिव लक्ष्यते मधुरवशिलीमुखरासिकस्य कुसुमायुधस्य । २ वयस्य यस्य ते मदन एवंदशाया अवस्थायाः कारणं स त्वमेव तं मदनमुपहसन्निदानीमुपहसनीयः ।

रामः—एवमेतत् इत्थं नाम प्रत्यक्षमपि कः पर्यालोचयेत् ।

विदूषकः—भवं ।

रामः—(सस्मितं) कोऽन्यः ।

विदूषकः—णं कोवि ।

रामः—वयस्य अलमुपालभ्य अनात्मज्ञत्वमप्युपालंभोपक्रममेव मन्मथव्यथायाः ।

विदूषकः—विसेसदो दाव वसंते ।

रामः—विशेषतो रामे इति च ब्रूहि । कुतः ।

शरसंधानचुम्बत्वं रामे रामासमुत्सुके ।
यथा कुसुमबाणस्य न तथाऽन्यत्र जातुचित् ॥ १४ ॥

विदूषकः—सव्वोवि खु कामुओ अप्पाणं एव्वं समत्थेदि ।

रामः—तथा वास्तु ।

विदूषकः—वअस्स दक्ख दक्ख एसो खु महुबिंदुसिहरच्छटादूसरदाए सिसिरसमाअमसंकं जणेइ दाणिं सहआरो ।

रामः—सम्यगुपलक्षितं । तथाहि ।

मधुरसपृषतप्रवर्षिणि सुखशिशिराः समुदीक्ष्य मंजरीः ।
शिशिरसमयशंकयाकुला न जहति कोटरमध्यकोकिलाः ॥ १५ ॥

यावदेतान् प्रतिबोधयामि ।

त्यजत मधु सगंधाः कोकिला निर्विशंकं
तरुविटपकुटीराभ्यन्तरावासभेदम् ।
भजत सहचरीभिः सार्थमेतानिदानीं-
मुपवनसहकारानुल्लसन्मंजरीकान् ॥ १६ ॥

---

१ भवान् । २ न कोपि । ३ विशेषतस्तावद्वसंते । ४ सर्वोपि खलु कामुक आत्मानमेव समर्थयते । ५ वयस्य पश्य पश्यैष खलु मधुबिंदुसीकरच्छटाधूसरतया शिशिरसमागमशंकां जनयतीदानीं सहकारः ।

विदूषकः-वयस्स इत एव उपविसम्म ।

रामः-यथा भवानाह ।

[उपविशतः]

रामः-(स्पर्शं रूपयित्वा) वयस्य कथमिवास्माभिरत्र क्षेमेण स्थीयते । इह हि-

उद्भेदोन्मुखकुड्मला विधुनुते वासंतिका मंजरी-
रामुंजन्मधुपोन्मादमुखरितार्द्धो वसंतानिलः ।
क्रीडापद्मसरस्तरंगयति च प्रेंखोलितांभोरुहः
सोयं मामुपलभ्य किं न कुरुते लब्धास्पदं चेद्भुशम् ॥१७॥

विदूषकः-अहो दुव्वहो मंमहो ।

रामः-(मदनावस्थां नाटयन्)

प्रियसख न शृणोषि त्वं किमेतानि शीघ्रं
श्रवणयुगमिदं मे गाढगाढं पिधेहि ।
इह खलु सहकारोद्यानभूमौ वसंतान्
मदकलकलकंठी कंठनिष्कूजितानि ॥ १८ ॥

विदूषकः—वयस्स सव्वदो कूजंतेसु कोइलेसु केतिअं वा कालं पिहिअंति कण्णा ।

रामः—यावज्जीवितं रक्षितव्यं ।

विदूषकः—अहं तेयत्थ उवाअं उवादिसिस्सं ।

रामः—किं सीतादर्शनोपायम् ।

विदूषकः—णहि णहि कोइलकूजिअसद्दादिवाहणुव्वाअं ।

रामः—कथमिव ।

---

१ वयस्य इत एवोपविशावः । २ अहो दुर्वहो मन्मथः । ३ वयस्य सर्वतः कूजत्सु कोकिलेषु कियंतं वा कालं पिधीयेते कर्णौ । ४ अहं तवैवोपायमुपदिशामि । ५ नहि नहि कोकिलकूजितशब्दातिवाहनोपायं ।

विदूषकः—वअस्स सवणादो अण्णं इत्थीअं णएहि मणं जत्थ हु मणं पअट्टिअं अक्खं वि सअं गहणादि[1] ।

रामः—यथाह भवान् (परितो विलोकयन् सोद्वेगं) वयस्य न तदपि सा स्थित्यै[2]। पश्य ।

कलुषयति विकीर्णः कौसुमोऽयं परागो
नयनयुगमिदं मे पश्यतो दह्यमानः ।
तिरयति विचलंती मंजरी पल्लवानां
मदयति मधुवर्षी मन्मथं चैष चूतः ॥ १९ ॥

तदेतद्भवतोपि प्रतीकारचिंतामतिवर्तते । अथवा ।

एता नूतनचूतकोरकशिखास्ताः कूंत निस्तंद्रितो
येन स्यान्मलयानिलस्य सुमहान् सौभाग्यदर्पो हृतः ।
सद्यो मुद्रितकुंचिका च मदनज्या शृंगमाला भवेत्
क्षव्यः सोपि निरायुधश्च भवति प्रायेण पुष्पायुधः ॥ २० ॥

अथवा मास्म तथा कृथाः येन मे प्रियाकर्णावतंसौचित्येन सहकारमंजरीषु सानुरागं मनः ।

विदूषकः—(सस्मितं) अण्णहा हि मए किल एदाओ कुदो विइण्णा[3] ।

रामः—वयस्य किमत्र कर्तव्यं ।

विदूषकः—धीरावलंबणं[4] ।

रामः—वयस्य ।

अवधीरितधैर्योहमधीराख्या कृतस्तया ।
धैर्यशब्दार्थबोधोपि दूरे कास्यावलंबनम् ॥ २१ ॥

विदूषकः—किं कादव्वदो दूसो चिट्ठ[5] ।

---

१ वयस्य श्रवणादन्यो स्त्रियं नय मनः यत्र खलु मनः प्रवर्तितं अक्षमपि स्वयं गृह्णाति । २ अन्यथा हि मया किलैताः कुतो विदीर्णाः । ३ धैर्यावलंबनं । ४ किंकर्तव्यता दूष्यः तिष्ठ ।

रामः—(सोपहासं) साधूपदिष्टमौपयिकं ।

विदूषकः—यत्तिअं मे उवाअपरिण्णाणवैभवं ।

रामः—(मदनावस्थां नाटयन्)

रचय कुसुमैः शय्यां स्वैरं विवेष्टनदायिनीं
सरसकदलीपत्रप्रांतानिलैरुपवीजय ।
सबिसवलयान्मुक्ताहारान्मुहुर्मुहुरर्पयन्
गुरुतरमसुं संतापं मे वयस्य लघूकुरु ॥ २२ ॥

विदूषकः—वअस्स एदं खु चूदविडपारूढाए माहविलदाए मलआणिलसंचालणपडिअकुसुमोक्करपवट्टिअपुप्फतप्पं मणिकुट्टिमं एदे अ सिसिरोवआरत्थं आमुक्का पूवं चेव तुह मोत्ताहारा । दाणिं पुण पदुमिणीदो मुणालायि कअलीघरादो कअलीदलाई जाव आणेमि (निष्क्रम्य प्रविश्योपसृत्य च) अम्मो एदे कअलीपत्तणिहित्तआ मुणाला सुमरावेंति मं भोअणं ।

रामः—वयस्य साध्वानीतं यावच्छिशिरोपचारे प्रवर्तस्व ।

विदूषकः—जं वअस्सो आणवेदि । (तथा करोति)

रामः—(सोद्वेगं) कृतं कृतमनेन ।

समंतादंगं मे शयनकुसुमैस्तुद्यत इतः
परं चैतच्चेतश्चलति कदलीपत्रमरुता ।
पतंतीतः प्रोषाद्विशिथिलगुणा मौक्तिकगुणाः
विसैःसार्धं वक्षः क्षपयति मम गाढव्यथमितः ॥ २३ ॥

---

१ एतावन्मे उपायपरिज्ञानवैभवं । २ वयस्य एतत् खलु चूतविटपारूढायाः माधवीलतायाः मलयानिलसंचालनपतितकुसुमोत्करप्रवर्तितपुष्पतल्पं मणिकुट्टिममेते च शिशिरोपचारार्थमामुक्ताः पूर्वमेव तव मुक्ताहाराः । इदानीं पुनः पद्मिन्याः मृणालानि कदलीगृहात् कदलीदलानि यावदानयामि । ३ अहो एते कदलीपत्रनिहिता मृणाला स्मारयंति मां भोजनं । ४ वद्यस्य आज्ञापयति ।

विदूषकः—ऐसो खु सो संतिकम्माणि भूदुप्पादो येण सिसिरोवआरो व्व संतापुप्पत्तिए हेदू[1] ।

रामः—वयस्य यत्सत्यमसौ शिशिरोपचारः शिरोपचारस्तेन मे शिरोवेदनामापादयति । तथाहि ।

ऊष्मनिष्पादने सोष्मा स्वैरमंगेष्वसौ मम ।
शैत्यापादनकृत्ये तु शीतला शीतलक्रिया ॥ २४ ॥

विदूषकः—सव्वं कअं सिसिरकम्मं जं जं मए जाणेआदि किं दाणिं करिस्सं[2] ।

रामः—

किं किं दुःशिशिरक्रियाव्यतिकरैरायासयस्यधनः
क्षोण्यां रूपय पुष्पतल्परचनां रंभादलं पारय ।
छित्त्वा विक्षिप दिक्षु मंक्षु चुदुकैराच्छिद्य मुक्तागुणान्
हस्ताभ्यां चमदाननिर्दयमनाः मुग्धा मृणालीलताः ॥२५॥

विदूषकः—साहु णियुत्तं सिसिरकम्मं वअस्स एआरिसंपि सिसिरकम्मं ण दे सिसिरोवआरबुद्धिं जणेअत्ति अच्चाहिदं[3] ।

रामः— (किंचिदात्मानमवस्थाप्य)

क्व विषयेषु विदेकसहं मनः
स्मृतिविमोहजडाः क्व च कामिनः ।
वदसि मह्यमनात्मवते कथं
कथय तुभ्यमविप्लुतचेतसे ॥ २६ ॥

विदूषकः—वअस्स किं अण्णं सिसिरकम्मं करिस्सं[4] ।

---

१ एषः खलु स शीतिकर्मणि भूतोत्पातः येन शिशिरोपचारेणैव संतापोत्पत्त्यै हेतुः । २ सर्वं कृतं शिशिरकर्म यद्यद् मया ज्ञायते किमिदानीं करिष्ये । ३ साधु-नियुक्तं शिशिरकर्म. वयस्यैतादृशमपि शिशिरकर्म न ते शिशिरोपचारबुद्धिं जनयतीत्यत्याहितं । ४ वयस्य किमन्यच्छिशिरकर्म करिष्ये ।

रामः—किं मां पुनः पुनः प्रजल्पैरुत्पीडयसि क इव जानाति शिशिरोपचारमितरच्च ।

विदूषकः—[1]वैअस्स एसा दाणिं पच्चाअआ एक्का दे अंतःकरणपउट्टि जाणइत्ति कहेमि ।

रामः— (सहर्षं) कासावेका ममान्तकप्रवृत्तिः जानकी । (उत्थातुमिच्छति) ।

विदूषकः—[2]वैअस्स एव्वं खु मए उदीरिअं एसा दे पच्चागआ एक्का जाणइ सिसिरोवआरं अंतःकरणपउट्टित्ति ।

रामः—कथमन्यथा चिंतितं अन्यथा परिणतं । वयस्य ।

यातां मम तन्मयतामंतःकरणप्रवृत्तिरपि दूरे ।
प्रत्यागमिष्यति तु सा प्रत्यागच्छेत्प्रिया यदि सा ॥ २७ ॥

(ततः प्रविशति सोत्कंठं सीता विनीता च)

सीता—पिअसहि विणीदे कहिं एसा मे सीसवेअणा उवसमिस्सिदि ।

विनीता—[3]अत्थ सो दिस्सइ ।

सीता—[4]कहिं ।

विनीता—[5]जो दे इमाए हेदू ।

सीता—किं [6]एसो मे अंगसंतावो ।

विनीता—जो तस्सवि हेदू

सीता—को वा तस्य हेतुः

विनीता—[7]जो तुए बद्धंजलिए अब्भत्थिओ ।

---

१ वयस्येषा इदानीं प्रत्यागतैका ते अंतःकरणप्रवृत्तिं जानातीति कथयामि । २ वयस्य एवं खलु मयोदीरितमेषा ते प्रत्यागता एका जानाति शिशिरोपचारमंतःकरणप्रवृत्तिरिति । ३ प्रियसखि विनीते कस्मिन्नेषा मे शीर्षवेदनोपशमिष्यति । ४ यत्र स दृश्यते । ५ कः । ६ यस्ते अस्याः हेतुः । ७ किमेष मेऽङ्गसंतापः । ८ यस्तस्यापि हेतुः । ९ को वा तस्य हेतुः । १० यस्त्वया बद्धांजल्याभ्यर्थितः ।

सीता—को वा अप्पणो सन्तावहेउं अब्भत्थेई[1]

विनीता—सोक्खहेउत्ति खु पत्थिओ संतावहेदू जादो[2]।

सीता—जइ संतापहेदू जादो कहं कीरिसो अज्ज सीसवेअणं अवणइस्सदि[3]।

विनीता—अदिट्ठो खु संदावहेदू[4] दिट्ठो उण सो सोक्खाअ महिए विअ पाउससमओ[5]।

सीता—तहवि तुए चेअ खु सो तदा अब्भत्थिओ ण उण मए[6]।

विनीता—बहिरंगापराद्धा अ सा मे वाआमेत्तेण पत्थणा तुए उण अंतरंगा अप्पत्था अ पत्थणा किदा[7]।

सीता—सहि कामदेवोत्ति खु मए अंजलिबन्धो पत्थणा अ किदा[8]।

विनीता—होदु कामं कामो एत्थ ववदेसो णिग्गच्छन्तिए उण दे वेवमाआणं ऊरुत्तब्भाणं[9]। किं भणासि[10]।

सीता—किं सो अपुव्वजणदस्सणसज्झसो ण हवे[11]।

विनीता—साहु[12] कप्पिओ एत्थ वाजो।

सीता—किं[13] अदो वरं।

विनीता—अणुरत्तविचिम्हणं[14] ते लोआणं किं पडिवज्जह[15]।

---

१ को वात्मनः सन्तापहेतुमभ्यर्थयते। २ सौख्यहेतुरिति खलु प्रार्थितः संतापहेतुर्जातः। ३ यदि संतापहेतुर्जातः कथं कीदृशोऽद्य शीर्षवेदनामपनयिष्यति। ४ अदृष्टः खलु संतापहेतुः दृष्टः पुनः सौख्याय मह्या इव प्रावृट्समयः। ५ तथापि त्वयैव खलु स तदाभ्यर्थितः न पुनर्मया। ६ बहिरंगापराद्धा च सा मे वाचामात्रेण प्रार्थना त्वया पुनरंतरंगा आत्मार्था च प्रार्थना कृता। ७ सखि कामदेव इति खलु मयाञ्जलिर्बद्धा प्रार्थना च कृता। ८ भवतु कामं कामोऽत्र व्यपदेशः निर्गच्छन्त्याः पुनस्ते वेपमानयोरुरुस्तंभयोः किं भणसि। ९ किं सोऽपूर्वजनदर्शनसाध्वसो न भवेत्। १० साधु कल्पितोऽत्र वाक्। ११ किमतो वरं। १२ अनुरक्तविचिन्तितयोर्लोचनयोः किं प्रतिपद्यते।

सीता—दोलारोहणक्किलंताए[1] आक्केअराइ णं मे लोअणाइ ।

विनीता—तहवि मए उण णिग्गमणाणुरुद्धाए[2] अंजलिणा सह विमुक्कधीराए मंमुहपाडिआणं मंमहपीडिआणं णिग्गमिदुं अणिच्छंतीणं दिट्ठिणं भावो कहं णिगूहिज्जहि[3] ।

सीता—सहि[4] अणुत्तरम्हि संउत्ता[5] ।

विनीता—[6]इरा तुमं अणुत्तरा अत्थि सु अवो उत्तरं ते पिअसमाअमणं[7] ।

सीता—एवं खु सहिअणो मं चिंतेदि मंतेदि अ[8] ।

विनीता—अणुभविस्सदि अ[9] ।

सीता—(आत्मगतं) कुदो मे सा सुजंमवता (प्रकाशं) सहि तह होदु[10] ।

विनीता—जइ मे दिट्ठिणं भाअदेआ[11] ।

सीता—हलो चिट्ठदु एदं कहिं दाव गदुअ एदं संदावं अवणेमो[12] ।

विनीता—पेच्छगमहुलच्छिमहुरं माहविवणं गच्छम्म ता इदो भट्टिदारिआ[13] ।

(उभे परिक्रामतः)

सीता—(सखेदं) हला केत्तिअं वा गंतव्वं[14] ।

विनीता—एणं आरामं गच्छेम्मो[15] ।

---

१ दोलारोहणक्लांतायाः आकैकरे ननु मे लोचने । २ तथापि मया पुनः निर्गमनारुद्धयाजिल्या सह विमुक्तधैर्यया मन्मुखपातितयोर्मन्मथपीडितयोर्निर्गंतुमनिच्छंत्योर्दृष्टयोर्भावो कथं निगूह्यते ३ सखि अनुत्तरास्मि संवृत्ता । ४ पुरा त्वं अनुत्तरा असि खल्वतः उत्तरं ते प्रियसमागमनं । ५ एवं खलु सखीजनो मां चिंतयते मंत्रयते च । ६ अनुभविष्यति च । ७ कुतो मे सा सुजन्मवता । ८ सखि तथा भवतु । ९ यदि मे दृष्टयोर्भागधेयः । १० सखि तिष्ठतु एतत् करिमस्तावद्वत्सैतं संतापमपनेष्यामः । ११ प्रत्यग्रमधुलक्ष्मीमधुरं माधविवनं गच्छावः तस्मादितो भर्तृदारिके । १२ सखि कियद्वा गंतव्यं । १३ एनमारामं गच्छामः ।

सीता—कहिं खु सो रामो ।

विनीता—भट्टिदारिए णं आरामो अम्हेहिं गच्छिअदिति खु मए भणिअं ।

सीता—(सविलक्ष्यस्मितं) हैला केइ खु दूरे सो आरामो ।

विनीता—(पुरो निर्दिश्य) एअं खु तं माहविवणं जाव पविसह्म ।

सीता—तेह ।

(उभे प्रविशतः)

हैला अविण्णादहिअअं तं जणं उक्कंठंती तुहवि अहं हिरअमि मुहं देउं ।

विनीता—भट्टिदारिए मा तह चिंतिअ तह णाम तुइ अणुरत्तदिट्ठिणिहाअणं खु सो सव्वहा उक्कंठिओ भवे ।

सीता—हला अओज्झाउरि एसो जणो ण खु इदो तस्य सट्ठिदी अवट्ठिदा ।

विनीता—तंहवि तुमं दट्ठू सो अपुण्णमणोरहो एअं देसं ण मुंचइ ।

विदूषकः—वेंअस्स केत्तिअं वा कालं पडिवालेमि जस्सिं दे एसो संदावो समं णीअदि ।

रामः—वयस्य एष मे निर्णयः ।

---

१ कस्मिन् खलु स रामः । २ भर्तृदारिके नन्वारामः आवाभ्यां गम्यतामिति खलु मया भणितं । ३ सखि कियति खलु दूरे स आरामः । ४ एतत्खलु तन्माधविवनं यावत्प्रविशामः । ५ तथा । ६ सखि अविज्ञातहृदयं तं जनमुत्कंठमाना तवापि अहं जिह्वेमि मुखं दर्शयितुं । ७ भर्तृदारिके मा तथा चिंतयित्वा तदा नाम स्वव्यनुरक्तदृष्टिनिधापनं खलु स सर्वथा उत्कंठितो भवेत् । ८ सखि अयोध्यापुर्यां स जनः न खलु इतस्तस्य संस्थितिरवस्थिता । ९ तथापि त्वां दृष्ट्वा सोऽपूर्णमनोरथ एतद्देशं न मुंचति । १० वयस्य किमद्य कालं प्रतिपालयामि यस्मिन् ते एष संतापः शमं नीयते ।

शीतांशुवदनां सीतां स्पृष्ट्वैव स्पर्शशीतलाम् ।
अपास्ततापमंगं मे शीतीभावमवाप्स्यति ॥ २८ ॥

विनीता—(कर्णं दत्वा) भट्टिदारिए इदो जणालावो विअ सुणिअदि[1]।

सीता—सहि इमिणा माहविगुम्मेणंतरिदो दक्खम्म[2]।

विनीता—(तथा कृत्वा दृष्ट्वा च) भट्टदारिए दिट्ठिआ वड्ढसि एसो दे हिअअवल्लहो[3]।

सीता—(दृष्ट्वा सहर्षं सानुरागं चात्मगतं) हिअअ पढिअवट्टावइ अप्पाणं किअत्थं खु दाणिं दे जम्मं[4] (साकारा संवरणं) किं णु दाणिं एदं दक्खंतिए किंपि वेपइ मे हिअअं ऊरुजुअलं च फुरइ वामच्छि अहरो अ सिथिली होइ णीविग्गंथि धीरं च किल्लम्मइ मणो सरीरं च[5]।

विनीता—अइ एव्वं भट्टदारिए इमस्स वि जणस्स विवित्तदेसे कोवि सेरालाओ वट्टइ तं सुणीस्सहा[6]।

सीता—जहं पिअसहीए रोआदि[7]।

विनीता—(विलोक्य) भट्टदारिए पेक्ख परिदो सिसिरोवआरपरिअरं[8]।

सीता—किं तेण मे[9]।

विनीता—भट्टिदारिए तुए उक्कट्ठाए संदाविओ खु सो[10]।

सीता—कहं अज्झवसिससि[11]।

---

१ भर्तृदारिके इतो जनालाप इव श्रूयते। २ सखि अमुना माधवीगुल्मेनांतरिते पश्यामः। ३ भर्तृदारिके दिष्ट्या वर्धसे एष ते हृदयवल्लभः। ४ हृदय पर्यवस्थापय आत्मानं कृतार्थं खल्विदानीं ते जन्म। ५ किं नु इदानीमेतं पश्यंत्याः किमपि वेपते मे हृदयमूरुयुगलं च स्फुरति वामाक्षि अधरश्च, शिथिली भवति नीविग्रंथिः धैर्यं च, क्लाम्यति मनः शरीरं च,। ६ यद्येवं भर्तृदारिके अस्यापि जनस्य विविक्ते देशे कोपि स्वैरालापो वर्तते तं श्रोष्यावः। ७ यथा प्रियसख्यै रोचते। ८ भर्तृदारिके पश्य परितः शिशिरोपचारपरिकरं। ९ किं तेन मे। १० भर्तृदारिके त्वय्युत्कंठया संतापितः खलु सः। ११ कथमध्यवस्यसि।

विनीता—जेइ मं ण पत्तिआसि दाणिं चेअ एअं सेरालावं सुणिस्ससि ।

विदूषकः—वेअस्स एअं अच्चाहिदं तुवंपि णाम ओहत्थिअसव्वसे-अवत्थुओ संतावावणोदत्थं एक्कं सीअं मण्णेसित्ति ।

रामः—(सनिर्वेदं तूष्णीमास्ते)

विनीता—अंसंपडिपत्तिए किं दाणिं तुसिससि ।

सीता—हला एक्कं सीअं वत्थु अत्थिति तु भणिअं ।

विनीता—हंत असंतुट्ठि ।

विदूषकः—वेअस्स अवहित्तेण अ सीआं पजप्पंतेण तुए कुदो दाणिं वाहित्तेण सीआपसंगे ण दीअदि पच्चुत्ति ।

रामः—किं तया ।

सीता—(श्रुत्वा सखेदमात्मगतं) किं तए इत्ति मं विहत्थेइ गआ मे मणोरहा ।

विनीता—(श्रुत्वात्मगतं) कहं एस अण्णहिअओ संउत्तो ।

सीता—हंजे किं दाणिं एत्थ ठीअदि दा गच्छम्ह ।

विनीता—भट्टिदारिए मा तुमं तुवरेहि पुणोवि एअं आलावं सुणिम्ह ।

सीता—उम्मत्तिए किं अदो वरंपि सुणिअदि ।

---

१ यदि मां प्रत्यापयसीदानीमेवैतं सैरालापं श्रोष्यसि । २ वयस्य एतदत्याहितं त्वमपि नामापहस्तितसर्वशीतवस्तुकः संतापापनोदार्थमेकां सीतां मन्यसे इति । ३ असंप्रतिपत्त्याःकिमिदानीं तुष्यसि । सखि एकं सीतं वस्त्वस्तीति खलु भणितं । ४ हंतासंतुष्टिः । ५ वयस्य अन्याहृतेन च सीता प्रजल्पता त्वया कुतः इदानीं व्याहृतेन सीताप्रसंगे न दीयते प्रत्युक्तिः । ६ किं तयेति मां विहस्तयति गता मे मनोरथाः । ७ कथमेषो अन्यहृदयः संवृत्तः । ८ सखि किमिदानीमत्र स्थीयते तावद्गच्छावः । ९ भर्तृदारिके मा त्वं त्वरस्व पुनरप्येतमालापं शृणुवः । १० उन्मत्तिके किं अतः वरमपि श्रूयते ।

विनीता—(आत्मगतं) कैहं अतिमेत्तं विसण्णा भट्टिदारिआ ।

सीता—(सनिर्वेदं) हलो एहि गच्छम्म अहव कहिं मए गच्छिअदि (इति मुह्यति)

विनीता—(ससंभ्रमं) समस्सिसिहि भट्टिदारिए समस्ससिहि ।

रामः—(कर्णं दत्वा) कथं स्त्रीजनसमाश्वासनशब्दः (उत्थाय ससंभ्रममुपसर्पति)

विदूषकः—(श्रुत्वा ससंभ्रमं) अविहा अविहा किं एदं (उपश्रुत्य दृष्ट्वा च) वअस्स एसा दे पाणवल्लहा ।

रामः—(दृष्ट्वा) कथं सीता (उपसृत्य) प्रिये समाश्वसिहि समाश्वसिहि।

सीता—(शनैश्शनैः समाश्वसिति) ।

रामः—(निर्वर्ण्य)—

उन्मील्य नेत्रे मदनेन सार्ध-
मपांगशारीकृतकर्णपूरे ।
समाश्वसित्यानननमायत्याक्ष्याः
समुच्छसत्पंकजकोशकांतिः ॥ २९ ॥

किं च ।

नयनयुगसितमध्यं
सितपर्यंतं विभाति शबलाक्ष्याः ।
शितधारमंतरत्सक-
ज्यैत्रं मदनस्य वज्रमिव ॥ ३० ॥

सीता—(समाश्वास्य रामं दृष्ट्वा सरोषं मुखं परावर्तयति ।)

---

१ कथमतिमात्रं विषण्णा भर्तृदारिका । २ सखि एहि गच्छावोऽथवा कस्मिन् मया गम्यते । ३ समाश्वसिहि भर्तृदारिके समाश्वसिहि । ४ अविद अविद किमेतत् । ५ वयस्य एषा ते प्राणवल्लभा ।

रामः—

इदं दरस्फुरदधरोष्ठपल्लवं
भ्रुवौ समुच्चमयदनर्घ्यविभ्रमम् ।
मुखं रुषा कलुषयिजिह्मलोचनं
कुतस्त्वया सुमुखि पराङ्मुखीकृतम् ॥ ३१ ॥

सीता—(गंतुमिच्छति) ।

विदूषकः—को दाणिं अदिक्कमो को एसो विओओ ।

रामः—(सरोषं गृहीत्वा) किमेष क एष वियोगः (आत्मगतं)

कृतापराधः किमु दौर्हृदस्त्या—
दयं जनो दासजनाभिशङ्कः ।
यद्गंतुकामासि समाश्वसद्मो
ममाद्य बिम्बोष्ठि मनोरथेभ्यः ॥ ३२ ॥

विदूषकः—(विनीतां प्रति) होदि[1] किं णु खु तत्तहोदिए कोवकारणं ।

विनीता—सीधवित्तिसअं पच्चुत्तिं कुदो ण देस्सिसित्ति तुए भणिदे किं दाए इत्ति भणिअं सुणिअ अप्पाणं विहत्थिअं जाणंती किल एसा णिव्विण्णा ।

रामः—(सस्मितं) कथं मयैवापराद्धं (सीतां प्रति) अयि मुग्धे किं तया दुस्त्यापफलोपलिप्सया दुर्ललितया प्रत्युक्त्येति खलु मया कथितं ।

विदूषकः—(सहासं) अम्हो अकालकोपणा अकारणकोपणा अ अत्तहोदी ।

सीता—(आत्मगतं) कहं अण्णहा मए कहिअं ।

---

१ क इदानीमतिक्रमः क एष वियोगः । २ भवति किं नु खलु तत्रभवत्याः कोपकारणं । ३ सीताविषयां प्रत्युक्तिं कुतो न दास्यसीति त्वया भणिते किं तयेति भणितं श्रुत्वात्मानं विहस्तितं जानंती किलैषा निर्विण्णा । ४ अहो अकालकोपना अकारणकोपना चात्रभवती । ५ कथमन्यथा मया कथितं ।

विनीता—कहं अण्णहा गहीअं अम्हेहिं ।

रामः—किंच ।

वचो यद्यपि निर्गच्छेन्मुग्धे स्वेच्छतरं मुखात् ।
रामो बहिश्चरान् प्राणान् कथं हित्वा विहस्तयेत् ॥ ३३ ॥

अथवा सुमहदनेनोपकृतमकाण्डकोपकारिणा मौक्ष्येन । कुतः ।

प्रणयादपि मानिन्या मानग्रह एव रोचते मह्यम् ।
ईर्ष्यायितमधुराणां येनाधिगमः कटाक्षाणाम् ॥ ३४ ॥

(नेपथ्ये)

अये प्राप्तः प्रदोषारंभः ।

यातो वासर एष शोषितजरत्कासारगतोदका
मार्तंडस्य करैरकुंठितशिखैः साकं करीषंकयैः ।
ये प्रातः प्रबलायिताः प्रतिदिशं प्रत्यागताः पक्षिण-
स्ते कांतासहिता विशंति निलयान् प्राप्तः प्रदोषोत्सवः ॥ ३५ ॥

रामः—(श्रुत्वा सखेदं) इदं पुनर्मिथुनं प्रविघटते ।

विनीता—कहं उण वणपालआणं उग्घोसो भट्टिदारिए इदो गच्छम्म ।

सीता—(आत्मगतं) केवलं सरीरमेत्तेण ।

विनीता—इदो इदो भट्टिदारिए ।

(परिक्रम्य निष्क्रांता सीता विनीता च)

रामः—(सौत्सुक्यं) कथमसौ न मुद्रयति कदाचिदभीप्सितफलावलेहिनोपि संकल्पयोनिः संकल्पात् । तथाहि—

इदृश्येव सीता ननु वर्शनीया
स्पृश्येव सा स्पर्शसुशीतलांगी ।

---

१ अन्यथा गृहीतमावाभ्यां । २ निराकुर्यात् । ३ कथं पुनः वनपालकाना- [illegible] भर्तृदारिके इतो गच्छावः । ४ केवलं शरीरमात्रेण । ५ इत इतो भर्तृदारिके ।

तथाप्यमीषां नु मनोरथानां
न शांतिरेषापि परं ममैव ॥ ३६ ॥

विदूषकः—वेअस्स अदिक्कामदि संझा । अज्ज हि दिअहसिरिविरहखेदविप्पमुक्कवहो चंदपादाभिघादभीदो विअ अवरं चेअ आसं अवलंबेदि पउट्ठाणुराओ दिअहणाहो ता एहि गच्छम्ह ।

रामः—(विलोक्य[1]) कथमिदानीमस्ताचलशिखरिशेखरश्रियं विडंबयति लंबमानो भगवान् गभस्तिमाली । (स्पर्शं रूपयित्वा)

उन्मीलन्नयमालिकांतरगलत्सौरभ्यसंवासिताः
श्रांताया दिवसश्रियो हिमकणैर्धर्माम्बुकल्पैर्जडाः ।
पेयाघ्राणघटैः सुखेन नितरामालिंगनीया भुजै-
र्निश्वासा इव वांति मंदमधुना याता वसंतश्रियः ॥ ३७ ॥

विदूषकः—इदो इदो पिअवअस्सो ।

(परिक्रम्य निष्क्रांतौ)

इति श्रीभट्टगोविंद स्वामिनः सूनुना **हस्तिमल्लेन** विरचिते
मैथिलीकल्याण नाम्नि नाटके द्वितीयोऽङ्कः ॥ २ ॥

---

१ वयस्य अतिक्रामति संध्या । अद्य हि दिवसश्रीविरहखेदविप्रमुक्तप्रभः चंद्रपादाभिघातभीत इवापरामेवाशामवलम्बते प्रवृद्धानुरागो दिवसनाथः । तस्मादेहि गच्छावः । २ इत इतः प्रियवयस्यः ।

तृतीयोऽङ्कः ॥ ३ ॥



(ततः प्रविशति वामनः)

वामनः—शोभणं खु लोईआ भणंति णत्थि स सुज्जे वासले पईवस्स अवसलेति जेण दाणिं सोहगवक्खजालंतलपविट्ठे पमिट्ठकक्कंतसिलत्थलणिघटणपडिफलणदिउणपआसिअवासघलोदले पज्जलंतलअणकुट्टिमुट्ठिअकंचणसलाआसहस्सपडिहे दक्खिलस्सिपसले तिमिलोम्मूलणकुसले पसलंते वालाअवे अहगे मोहलअणप्पईवगहेण महालाअस्स पस्सादो पलिसमाविअझेवासमए दिअसमुहम्मि णिग्गए । (परिक्रामन् श्रमं नाटयित्वा) किलंत्तोह्म उण्हच्छासेण कुत्थ उण हि विस्समिस्सं (विचिंत्य) होदु घलं चेअ गच्छेमि । केण खु ए मे गमणसल्लावलाहो भविह्सदि ।

(ततः प्रविशति कुब्जः)

कुब्जः—अज्ज पच्चूसविअसंतघलदिग्घिआसलोलुहमउलोदलगलिअवहुलमअलंदलसोल्लिए पविललोसाअजललवजलीकए अइमत्तसीअलिकिअमोत्ताहलजालए अणब्भत्थिअतालउंताणिले मंदाणिले वाअंदे णिवासंते

---

१ शोभनं खलु लौकिका भणंति नास्ति स सूर्ये वासरे प्रदीपस्यावसर इति येनेदानीं सौधगवाक्षजालांतरप्रविष्टे प्रमृष्टार्ककांताशिलातलनिपतनप्रतिफलनद्विगुणप्रकाशितवासगृहोदरे प्रज्वलद्रत्नकुट्टिमोत्थितकांचनशलाकासहस्रप्रतिमे दक्षरश्मिप्रसरे तिमिरोन्मूलनकुशले प्रसरति बालातपे अहमपि मोघरत्नप्रदीपगृहेण महाराजस्य पाश्चात्यपरिसमाप्तिसेवासमयदिवसमुखे निर्गतः । २ क्लान्तोस्मि उष्णोच्छ्वासेन कुत्र पुनर्हि विश्रमिष्ये । ३ भवतु गृहमेव गच्छामि केन खल्विदानीं मे गमनसंलापलाभो भविष्यति । ४ अद्य प्रत्यूषविकसंतगृहदीर्घिकासरोरुहमुकुलोदरगलितबहलमकरंदरसार्द्रिते प्रविरलावश्यायजललवजडीकृतेतिमात्रशीतलीकृतमुक्ताफलजालिके अनभ्यर्थिततालवृंतानिले मंदानिले वाति निवासांतेऽहमपि लब्धविश्रामावसरः विमुक्तालवृंतग्रहणः निर्गतो महाराजस्य पार्श्वात् तस्मादिदानीमात्मनः गृहं गच्छामि ।

अहगोवि लद्धविस्समावसले विमुक्कतालउंतगहणे णिग्गए महालाअस्स पस्सदो ता दाणि अप्पणो घलं गच्छेमि (परिक्रामति)।

वामनः—(दृष्ट्वा) अम्हो तालउंतग्गाही पिअसहो दासेलए जाव एअं सद्दावेमि । ले दासेलअ ।

कुब्जः—(आकर्ण्य दृष्ट्वा च) अम्हो लंअणदीवग्गाहिं पिअसहे उलल्लमए (उपसर्पति)

वामनः—(निर्वर्ण्य) अले पिअवअस्सा दासेलआ तुम्हे विलूव्वआ खु ओहसणिज्जा ।

कुब्जः—तहँ हि ।

हिअंति कलभा विअ एत्थ ण सअणं लहेंति उत्ताणं ।
ओऊहणं लहन्ति अं णिलंतलं वक्कहिअआओ ॥ १ ॥

(सहासं) अँले उलंभआ कलभगमणं खु उत्तमाणं पुलिसाणं गमणंति पसस्सिअदि ।

वामनः—(सहासं) सिलोसिदे अहिलासो जं अण्णहा भणिअंपि अण्णहा वक्खाणेसि मए खु कलह एत्ति सिंखल एव भणिएज्झं ण उण विक्के अदो येव्वं खु णं दासेलए त्ति तुवं अंत्तेउले सद्दाविअसि ।

कुब्जः—(सहासं सेर्ष्यं) अँले किं तुवं अप्पह्मि अंधेसि तुह्मेहिं खु वामणेहिं ।

---

१ अहो तालवृंतग्राही प्रियसखा दासेरकः यावदेतं शब्दापयामि । रे रे दासेरक २ अहो रत्नदीपग्राही प्रियसखा उरभ्रकः । ३ अरे प्रियवयस्या दासेरका यूयं विरूपका खलु उपहसनीयाः । ४. तथाहि । गच्छंति करभा इवात्र न शयनं लभन्त्युत्तानं । उपगूहनं रतौ च निरंतरं वक्रहृदयकाः । ५ अरे उरभ्रक कलभगमनं स्वच्छतमानां पुरुषाणां गमनमिति प्रशस्यते । ६ श्लोषितेऽभिलाषः यस्मात् अन्यथा भणितमपि अन्यथा व्याख्यासि मयखलु कलभ इति शृंखल एव भणितं न पुनर्विक्के, अत एव खलु ननु दासेरक इति त्वमंतः पुरे शब्दापयसि । ७ अरे किं त्वमात्मन्यंधोसि युष्माभिः खलु वामनैः ।

आसणसलिसठिईहिं अत्थिअदो उत्थिअं पदंतेहिं ।
चडुलणिउञ्जगेहिं गच्छिअवि कच्छवेहि विअ ॥ २ ॥

वामनः—(सहासं) हिमाणए सुट्ठु कए उवालंभस्स पलिउवालंभे पिअसहा म हु मज्झं असूहेइ जाव दाणिं अहमे तुह्मे पसंसेवि सुअस्स दाव ।

पावंति लद्धम्मि दासिआओ
दिढपलिलब्भउआलपुण्णआओ ।
हिअअं वि सहावउण्णअंतं
सुमहंतं ण खु अत्थि अण्णआणं ॥ ३ ॥

कुब्जः—(सहासं) साहु पसंसिअं पिअसह तेण हि अहंपि तुह्मे पसंसिस्सं होमि ।

वेहाहिअउद्धपिट्ठिआ
णिहुवणखुंबिअणाहिकूविआ ।
अंसेसु कअग्गहत्थअं
उवऊहंति खु कोट्टिणीअणं ॥ ४ ॥

वामनः—(सहासं) साहु पसंसिअं ।

उभौ—(सहासं) अले सुसंगदं खु एअं णिउञ्जं ।

कुब्जः—(उवहसेदि पसंसेदि अ कुञ्जं णिउञ्जोति ।)

वामनः—अले दक्ख दाव अम्हालिसस्स लाअपलिवालस्स ।

---

१ आसनसदृशस्थितिभिरर्थतः आत्मतं पतद्भिः चतुलनिकुञ्जगैः गम्यते कच्छपैरिव । २ अहो सुष्ठु कृतमुपालंभस्य प्रत्युपालंभः प्रियसखे मा खलु मद्यमसूयय यावदिदानीं महं युष्मान् प्रशंसे । शृणु तावत् । प्राप्नुवंति रतौ दास्यः दृढपरिरंभमुदारपुण्यकाः । हृदयमपि स्वभावोन्नतं सुमहत्त्वं न खल्वस्त्यन्येषाम् । ३ साधु प्रशंसितं प्रियसखे तेन हि अहमपि युष्मान् प्रशंसितं भवामि । देहधिक्कोर्ध्वपृष्ठका निर्भुवनचुम्बितनाभिकूपिकाः । अंशेषु कचग्रहार्थमुपगूहंति खलु कुट्टिनीजनं । ४ साधु प्रशंसितं । ५ अरे सुसंगतं खलु एतं निकुंजं । ६ उपहसति प्रशंसति च कुब्जं निकुञ्ज इति । ७ अरे पश्य तावदस्मादृशस्य राजपरिवारस्य ।

कुब्जः—अले विलूवपलिअणा खु वा ईसे सिलाहोंति चेअ पमह-गणपलिआलणे इस्सले चेअ एणं एत्थ णिदस्सणं जल्लाअपलिवाले कुज्जो वामणो एव्व णूआ बब्बला कीलाइ संवेदि ।

वामनः—अले मा खु अपला हि संति अ संढंपि ओहासेण कलु-सेहि । स खु—

इत्थेहिं पुलिसे विअ खेलवि पुलिसेहि इत्थिआ पव्व ।
पुलिसेहि पुलिसेविअ इत्थेहिं इत्थिअं चेव ॥ ५ ॥

कुब्जः—अले एव्वं एअं लक्खउद्दाहलणं । किलिबेभट्टिदारिआए मोहिलीए महंतलीआ कलावई । सा खु—

पअडिचउला कव्वेसु कलासु उत्तला अ सअलासु ।
णेत्तविलोभणरूआ अणंगदोत्तम्हि अहिऊआ ॥ ६ ॥

वामनः—(विलोक्य) अले एसे खु से वलिसधले कलावई इद अभि-वट्टइ इमिणा पुणा सल्लावचटलेण संढेण सज्ज विसत्ताणं अहमाणं महंते काले गच्छेइ । ता एहि अम्हो इदो सिग्घं घलं चिअ गच्छेमो ।

कुब्जः—एवं कलेह्म ।

(उभे परिक्रम्य निष्क्रान्तौ)

---

१ अरे विलूपपरिजनाः खलु वा ईषत् श्लाघंत एव प्रमदागणपरिपालने ईश्वर इव नक्षत्र निदर्शनं यस्मात् राजपरिवारे कुब्जा वामना एडा मूका बर्बरा किराता-स्तिष्ठंति । २ अरे मा खलु अपरा हि संति च षंढमपि उपहासेन कलुषय खलु स्त्रीभिः पुरुष इव खेलति पुरुषैः स्त्रिय इव पुरुषैः पुरुष इव स्त्रीभिःस्त्रियमिव । ३ अरे एवमेतल्लक्षोदाहरणं क्लीवभर्तृदारिकाया मैथिल्या महत्तरीका कलावती । सा खलु, प्रकृतिचतुरा काव्येषु कलासूत्तरा च सुकलासु नेत्रविलोभनरूपाऽनंगदौत्यैरभिरूपा । ४ अरे एषा खलु सा वर्षधरा कलावती इतोऽभिवर्ततेऽनेन पुनः सल्लापचतुरेण षंढेन सद्यः विश्रांतयोरावयोर्महान् कालो गच्छति । तस्मात् एहि आवामितः शीघ्रं गृहमेव गच्छावः । ५ एवं कुर्मः ।

प्रवेशकः ।

(ततः प्रविशति षंढः)

षंढः-- (यथोचितं परिक्रामन्) हंत भो विदेहेश्वरदुहितुः परां कोटिमधिरोहति मदनोन्मादः ।

प्रततमखिलाः पश्यत्याशाः न किंचन पश्यति
स्तिमितमसकृत्सा संधत्ते दधाति च वेपथुम् ।
न खलु भजते भद्रां निद्रां न च प्रतिबुध्यते
स्मरति न पुनः किंचित्तं च स्मरत्यधिकस्मरा ॥ ७ ॥

अपि च । व्याजृंभमाणकुमुदकुड्मलकुहरचंक्रमणसंक्रांतसौरभाकृष्टमलयानिलानुलिप्तासु मंडलीकृतशरासनसंधीयमानशरशतोत्क्षेपव्याकृतमन्मथासु कौमुदीविशदासु च क्षणदासु ।

किं चंद्रातपवारणोत्सुकतया किं चंदनार्द्रच्छटा
चर्चापाकरणाय किं शशिशिलानिष्पंदसेकेर्ष्यया ।
किं रंभादलवीजनं व्युदसितुं किं मन्मथं वंदितुं
शक्तुं वा स्वयमेव हस्तमबलाधिक्कृच्छ्रमुद्यच्छति ॥ ८ ॥

एवं च मन्ये । "ज्वलतानेन कदाचिद्धियता कालिकेन हृदयमिदं । इति किल तत्प्रतिकर्तुं सुश्लिष्टा स्तनतटा तस्याः" । इत्यं च प्रतिक्षणमुपर्युपरि वर्धमानायामवधीरितप्रतिविधानायां मनसिजरुजायामद्य तु पुनः प्रमदवनमध्यवर्तिनि धारागृहे वर्तमाना सांद्रचंदनक्षोदचर्चितपल्लवास्तरनिस्सहविधूतशरीरा भर्तृदारिका सीता विहस्तयंतीव सखीजनोपपादितां शिशिरोपचारनियंत्रणां दीर्घमुष्णं च निश्वस्य निवेदयंतीव संतापं प्रकाशयंतीवांतर्गतं भावं किमप्युपालंभमानेव प्रार्थयमानेव च मां किंचिदिवोन्नमयंती भ्रूलताग्रभागं पक्ष्माग्रग्रथितबाष्पजललवलुलितां कातरकातरमाकेकरतारकां साकूतां मन्मुख एव दृष्टिं पातितवती । अहं च गृहीतहृदयतया तत्क्षणमेव कृतं

संदेहेन संपादयामि ते समीहितमित्यवचनमेव प्रेमगर्भेण दीक्षितेन समाश्वास्य सव्याजमुत्थाय दूत्याकारावलंबनेन निरवगमम् । तथावदिदानीमवलंबितं रामचंद्रस्यैव पार्श्वं गच्छामि (परिक्रम्य) एवं च पुनरवोचदस्मत्कर्णीते भर्तृदारिका हृदयनिर्विशेषा गृहीतभावा विनीता 'पिअसहि कलावई माहविवणे खु णं भट्टिणा रामेण भट्टिदारिआ दिट्ठा ता सोवि पदेसो तुए अण्णोसिदव्वोत्ति मण्णे सोवि तहिं चेअ वट्टदि । कुदो ।

जत्थ खु पढमं दिण्णे अच्छीणं ऊसवो पिअजणेण ।
उक्कंठिअं जणं पुण सोपि पयेसो विणोदेई ॥ ९ ॥

ता जाव माहविवणं गच्छेमि । (परिक्रामति अग्रतो विलोक्य ससंभ्रमं) कहं एक्को विडो मं उवसप्पिअ विहसिअमुहो भणाइ । जहहि ।

विटः—अये केयं कन्यका कथं राजकन्यका । भद्रिके श्रूयतां । मुक्ताहारे गाढं चुंबनभयगुरौ न स्तनकलशे पर्यये लोभोऽन्तरं । नालं भारं सोढुं मध्यः सुतनु तनुरपि तव तयोः सकुंकुमपंकयोः तथावत्त्वां याचे लीलानिहितपदमनतिमुखरक्वणन्मणिनूपुरं मुक्तायासं मंदं मंदं श्रुतिसुभगरणितरशनं प्रयाहि नितंबिनी (इति सलज्जं असौ स्तनसंन्यस्तहस्ता अपक्रम्य विलोक्य च) अये अयमग्रतो वेश्यावाटः । इह हि ।

प्रौढांगनाकुचिरकंठघनांगरागः
कस्तूरिकापरिमलस्पृहणीयगंधः ।
सौभाग्यगर्वरसमंथर एव गत्या
चेतः प्रलोभयति नस्तरुणो नभस्वान् ॥ १० ॥

---

१. प्रियसखी कलावती माधवीवने खलु ननु भर्तृणा रामेण भर्तृदारिका दृष्टा तस्मात्सोपि प्रदेशस्त्वयान्वेष्टव्यः इति मन्ये सोपि तस्मिन्नेव वर्तते । कुतः । यत्र खलु प्रथमं दत्तः अक्ष्णोः उत्सवः प्रियजनेन उत्कंठितं जनं पुनः सोपि प्रदेशो विनोदयति । तस्मान्माधविवनं गच्छामि । २ कथमेको विटो मामुपहस्य विकसित मुखो भण्यते ।

(पुरो विलोक्य) का पुण एसा किंपि संकंती विअ थणंसूओगुंठिआ अ पावं अवहिरिअ इदो अभिवट्टइ (निरूप्य) कहं वेसवहूहि रम्मइ हला किं तुवे कंति विअ आअच्छसि । किं भणासि हला एत्थ वेसवाडमुह-मंडववट्टिणिं धुत्तगोट्ठिं परिहरिअ अत्ताणं णिग्गहमाणा आअच्छेमित्ति । तेण हि जुज्जइ धुत्ता हु णाम ।

महिलंअपुव्वआमवि विस्सद्धं विअ कुणंति चाडूहिं ।
तह तह वि णिवारिंता कहवि ण मुंचेवि पत्थेंता ॥ ११ ॥

(सलज्जं) हंजे एव्वं च अहं वि लज्जेमि तेण पहेण गंतुं ता गच्छ तुमं (विचिंत्य) जावं अहंपि इमाए कुसुमायण्णवीहिआए गदुअ माहविवणं पवेसेमि (परिक्रम्य) एसे कुसुमवणवीहिं (निर्वर्ण्य) एत्थ हु णिच्चं अआलकुसुमसमूहआहिअउदुगुणा सव्वजणसुअत्तणकरी वसइ मधुसरि । (पुनर्निर्वर्ण्य)

तामिह दक्षिणपवनो मृदु परिरभते विकाशयति ।
स्पृशति च जिघ्रति चुंबति पुलकयति त्वयमयमधुना ॥ १२ ॥

(अग्रतो विलोक्य) कथमसौ स्वोद्वसितालिंदोपांतोपविष्टा नख-मुखविपाटितानि सौगंधिककुसुमानि ग्रन्थाति भितेनैव समानयति मां वासंतिका । (उपेत्य) वासु वासंतिके ।

---

१ का पुनरेषा किमपि शंकमानेव स्तनांशुकावगुंठिता । च पापमवधीर्यैतोभि-वर्तते । २ कथं वेश्यवधूभिः रम्यते सखि किं त्वं क्षांतेवागच्छसि । किं भणसि । सखि अत्र वेश्यावाटमुखमंडपवर्तिनीं धूर्तगोष्ठिं परिहृत्यात्मानं निग्रहमाणा आग-च्छामि । तेन हि युज्यते धूर्ता खलु नाम । महिलामपूर्वामपि विश्रब्धामिव कुर्वंति चाटुभिः तथा तथापि निवारिता कथमपि न मुंचति प्रार्थ्यमाना । ३ सखि एवं चाहमपि लज्जामि तेन पथेन गंतुं । तत्साद्गच्छ त्वं ४ यावदहमपि अनया कुसुमा-यणवीथ्या गत्वा माधवीवनं प्रविशामि । ५ एषा खलु कुसुमवनवीथिः । ६ अत्र खलु नित्यमकालकुसुमसमूहमाहितगुणा सर्वजनोत्सुकरी मधुश्रीः ।

क्रीणाति पुष्पाणि युवा त्वया च-
स्सल्लापसौख्येन विलोभ्यमानः ।
पश्यामि तस्माच्च वरं स एव
क्रीणात्ययं त्वां कुसुमोपभोगिनम् ॥ १३ ॥

किं ब्रवीषि प्रियसखि संभाव्यतामसौ चेटकुरबरसभर्पणेन सौगन्धिकमालेति सकोपं कथमसौ कट्वा स्त्रियमिव मां कदर्थयति तत्किमनया । इतो वयं (परीक्ष्य विलोक्य च) एतन्माधवीवनद्वारं यावत्प्रविशामि (प्रविश्य) अनेन खलु मया भर्तृदारिका दौत्यावलंबिना कालातिपातप्रमादिना न भवितव्यं । कुतः ।

सैषा संप्रति नैव तावदबलाकालातिपातक्षमा
शांतं पापमभंगलं प्रतिहतं तापः कथं कथ्यते ।
का वार्ता स्तनभारमध्यपतिते मुग्धे मृणालांकुरे
हारास्तत्क्षणमेव वक्षसि यदा नीलोत्पलश्यामलाः ॥ १४ ॥

अपि च तस्याः खलु ।

किसलयतल्पसमर्पित देहाया मदनदहनतप्तायाः ।
हाराः स्वदेहनिहिता जनयंति स्फोटकाशंकाम् ॥ १५ ॥

एतच्च नः संप्रति दूत्ये त्वरयति । अथ हि ।

अस्माभिः शिशिरोपचारविधिना कृच्छात्समाश्वासिता
संकल्पाहितकांतसंनिधिसुखा मोहावसाने पुनः ।
सा बाला विवशा प्रवालशयनादुत्थाय सभ्रमयं
स्मेरा किंचिदधोमुखी सशनकैराकाशमालिंगति ॥ १६ ॥

(अन्यतो विलोक्य) कथमसौ माधवीवनपालिका गंधवती । भद्रे गंधवति विमुक्तमाधवीजनविहारसुखा किमिति द्वारोपांत एव वर्तसे । किं ब्रवीषि ।

अज्ज अब्भंतरे वअस्ससहिदो दासरही वट्टइत्ति युज्यते (आत्मगतं) सफलं मो दौत्यं (व्रीडां नाटयति) गंधवती तेण हि अहंपि लज्जोमि तस्स पासे विहरिदुं अण्णदो विहरिस्सं ति । कथं अपक्रम्य निष्कांता गंधवती । षंढः (निर्वर्ण्य) अहो रामणीयकं माधवीवनस्य । इह हि ।

अयं खलु विलासिनीमुखसरोजगण्डूषितै-
र्विभाति मधुसीकरैरसमयेपि संभावितः ।
मदांधमधुपांगनाजननिपीतकादंबरी-
रसप्रसरधूसरः प्रसवकेसरः केसरः ॥ १७ ॥

कहं सिंजअरवाअड्ढा घटेंति मे तुलाकोडिकोडिसु उज्जाणदिग्घिआसु कलहंसिआ ता जह एदेण सिज्जंति मंजीरिआ तह एअं उद्देसं णिस्संद-अण्णा संगच्छेमि (तथा परिक्रम्य) यावदहं रामचंद्रमासाद्य इत्यं संपादयामि (विचिंत्य सखेदं) अहवा कित्तिएत्ति अहं पिअसहिए सोअ-णिज्जं दसं णिवेदेमि भट्टिणो । सा खु ।

परितवइ थणाणं मोहविण्णत्तणाणं
अकअतवगुणाणं तस्स आलिंगणाणं ।
अह अ णिअरुआए अप्पबीआरदाए
ण हु मुणइ सहीओ अप्पणोसा सहीओ ॥ १८ ॥

(उपवनं निर्वर्ण्य) अथवालं एभिः शोभनीयाक्षरैः ।

---

१ आर्य अभ्यंतरे वयस्य सहितो दशरथिः वर्तते इति । २ तेन हि अहमपि लज्जे तस्य पार्श्वे विहर्तुं तस्मादन्यतो विहरिष्यामि । ३ कथ सिंजितरवाकृष्टा घटंते मे तुलाको टिकोटिषु उद्यानदीर्घिकासु कलहंसिका । तस्मादधिते न सिंजंति मंजरिकास्तथा एनमुद्देशं निष्पंदे अन्यान् संगच्छामि । ४ अथवा कियतीत्यहं प्रियसख्याः शोचनीयां दशां निवेदयामि भर्तुः । सा खलु । परितपति स्तनयो-र्मौक्तिकविज्ञातयोरकृततपगुणयोस्तस्यालिंगनयोः । अथ च निजरूपया अप्रतीकारतया सहि जानंति सख्यः आत्मसात्स्नेहाः ।

अभ्यग्रपुष्पत्सहकारमेतत्
मंदानिलस्वैरविहारहृद्यम् ।
उद्यानमुद्दाममनोभवं नः
करोति साहाय्यकमद्य वृत्ये ॥ १९ ॥

(पुरोवलोक्य) मन्ये स एव दाशरथिः परममित्रं गार्ग्यायणः यावदुपसर्पामि ।

(उपसर्पति)

(ततः प्रविशति विदूषकः)

विदूषकः— (दृष्ट्वा) केहं एका एसा महणिज्जा इत्थिआ (उपसृत्य) होदि कुदो मं उवसप्पसि ।

पंढः—अज्ज किं वि पुच्छिदुं ।

विदूषकः—तेण हि पुच्छेसि ते समीहिअं

पंढः—कहिं दे पिअवअस्सो ।

विदूषकः—को[5] मे पिअवअस्सो ।

पंढः—दासरहि ।

विदूषकः—किं तं जाणासि ।

पंढः—केहं सुज्जं हत्थेण ओआरेसि ।

विदूषकः—किं[10] तेण कज्जं ।

पंढः—किंपि[11] तस्स पणयिणि संदेसं आचक्खिउं ।

विदूषकः—कौ वा तस्स पणयिणि ।

पंढः—सीओ[13] ।

---

१ कथमेकैषा महनीया स्त्री । २ भवति कुतो मामुपसर्पसि । ३ आर्य किमपि पृष्टुं । ४ तेन हि पृच्छ ते समीहितं । ५ कस्मिन् ते प्रियवयस्यः । ६ कोऽयं प्रियसखः । ७ दाशरथिः । ८ किं तं न जानासि । ९ कथं सूर्यं हस्तेनापवारयसि । १० किं तेन कार्यं । ११ किमपि तस्य प्रणयिन्याः संदेशमाख्यातं । १२ का वा तस्य प्रणयिनी । १३ सीता ।

विदूषकः—(सहर्षं) किं[1] तुमं तस्सा सहि ।

षंढः—ओम[2] ।

विदूषकः—(सहर्षं) तेण[3] हि विरमेमि इमादो परिब्भमादो[4] ।

षंढः—किंति[5] खु पुव्वं परिब्भमेसि ।

विदूषकः—तत्तहोदी[6] सिसिरोवआरोवआरणाणि आणेदुं परिब्भमामि तुमं पुण दाणिं तस्स अणिरिसं सिसिरोवआरोवअरणं लद्धा ता एहि दाणिं सिग्घं वअस्सस्स पासं येव्व गमिस्सम्म ।

षंढः—तथा ।

(परिक्रामतः)

(ततः प्रविशति रामः)

रामः—(सोत्कंठं) सा खलु ।

श्लाघा विभ्रमलक्ष्म्या शृंगाररसाधिदेवता साक्षात् ।
संचारिणी पदाभ्यां मूर्तिमती कैशिकी वृत्तिः ॥ २० ॥

अहो दुर्वारा मानसी प्रवृत्तिः । अथ हि ।

स्पृशति मयि सा रुद्धालीकध्वलीककलंकिते
किमपि रुदति यन्मोहान्ते भयोच्छ्रितवेपथुः ।

कमलकलिकावातस्मेरा व्यलोकत सस्पृहं
स्फुरति हृदि तत्किंचिद् व्रीडांचितं किलकिंचित् ॥ २१ ॥

किंच सुमहदिह वयं विस्मेराः यदुत विषयनुषंगकलुषितं जनं परिवदंतो वयमेव कामुकजनधैर्यामिषचस्मरेण स्मरेण खलीकृता स्मः । अथवा ।

---

१ किं त्वं तस्याः सखी । २ ओम् । ३ तेन हि विरम्यते अस्मात् परिश्रमात् । ४ किमिति खलु पूर्वं परिश्रमसि । ५ तत्रभवती शिशिरोपचारोपकरणान्यानेतुं परिश्रामामि त्वं पुनरिदानीं तस्यानीदृशं शिशिरोपचारोपकरणं लब्ध्वा स्मादेहि इदानीं शीघ्रं वयस्यस्य पार्श्वमेव गमिष्यावः ।

स्वच्छांतरात्मापि गुणेन मन्ये
न स्याद्दृशो वर्षक शासनस्य ।
तस्याः स्तनौ यन्नवकुंकुमार्द्रौ
चाश्लिष्य हारोप्यनुरक्त आसीत् ॥ २२ ॥

(विचिंत्य) कथं नु मो तद्गुणचिंतादुस्थितं चेतः पर्यवस्थापयामि (विभाव्य)

यत्र यत्र मया दृष्टा दयिताया मृगेक्षणा ।
विनोदयेयमात्मानं तं तमुद्देशमुद्दिशन् ॥ २३ ॥

(अवलोक्य सकौतुकं) ।

अत्राकारणरूढकोपजनितां मूर्छां विषादोत्तरां
तत्कालोपनतेन निःसहतनुः कृच्छ्रान्मया मोचिता ।
अग्रे मामथ वीक्ष्य सेर्ष्यमकरोदन्यापसर्तुं मनः
सव्याजं नयनांतमत्र विधुरं यांती मयि प्राहिणोत् ॥ २४ ॥

(सखेदं) कथमेतदपि नालं विरहखेदापनोदनाय (सविस्मयं) ।

चित्रं नः स्फुरतीदं हृदयमनेनापि विरहवहनेन ।
कुसुमशरस्यापि शरा निर्मग्ना नैव दृश्यंते ॥ २५ ॥

(विचिंत्य) क इवात्र समाधिः । वयस्य गार्ग्यायण (पार्श्वतोऽवलोक्य) कथं न संनिहितो वयस्यः अहो मे प्रमादः मयैव हि शिशिरोपचारसज्जीकरणाय प्रेषितो वयस्यः (पुरो विलोक्य) कथमेकया स्त्रिया सहितः प्रहृष्ट इव वयस्यः इहागच्छति । (निरूप्य) नहि नहि येन केन पुरुषेण (विभाव्य) कथमसौ तृतीया प्रकृतिः । कुतः खल्वयमनियुक्तकारी केनापि षंढेन सहागच्छति वैधवेयः ।

विदूषकः—(उपसृत्य) जेयदु पिअवअस्सो[1] ।

षंढः—जयतु स्वामी ।

---

1. जयतु प्रियवयस्यः ।

विदूषकः—अम्हो पुव्वं इत्थिआ विअ मए संजप्पिअं वअस्सेण दाणिं पुरिसो विअ संभासदि ।[1]

रामः—एषा खलु ते गाढोपचारः ।

विदूषकः—एसो खु तुह सिसिरोवआरो ।

रामः—न खलु यथावज्जानामि ।

विदूषकः—एसो खुं तत्तहोदिए सीदाए तुए संजावुक्कंठाए पहिदा दूई ।

रामः—(सादरं) आर्य स्वागतं इहोपविश्यतां ।

षंढः—यथाज्ञापयति स्वामी ।

रामः—वयस्य उपविश ।

विदूषकः—जं भवं भण्णाति ।

(सर्वे उपविशंति)

रामः—(षंढं प्रति) सखे प्रियावृत्तांतनिवेदनेन विध्यापय विरहवन्हिं ।

षंढः—शृणोतु स्वामी ।

सख्यास्तावद्विरहविधुरं भावमाख्यातुकामः
प्रेमाक्रांतं हृदयमपि ते तादृशं तर्कयामि ।
यिर्त्तभोऽयं मुखरयति मामंग तस्माद्विधानी-
मागंतव्यं त्वरिततरमित्येव विज्ञापयामि ॥ २६ ॥

विदूषकः—तेहवि कहेहि तत्तहोदीए अवत्थं ।

रामः—सखे कथ्यताम् ।

षंढः—

---

१ अहो पूर्वं स्त्रीव मया संजल्पितं वयस्येनेदानीं पुरुष इव संभाषयति । २ एष खलु तव शिशिरोपचारः । ३ एषा खलु तत्रभवत्या सीतया त्वयि संयोगोत्कण्ठितया विहिता दूती । ४ यद्भवान् भणति । ५ तथापि कथय तत्र भवत्या अवस्थाम् ।

अंगाकर्णय सा हि मन्मथशरासारैकलक्षीकृता
नो मिथ्याकुरुते वचांसि विरहे बाला कथीनामपि ।
किं वा संप्रति कथ्यते बहुतरं यत्सत्यमत्रांतरे
सर्वस्यापि सखीजनस्य भवतो नामैव नामाभवत् ॥ २७ ॥

विदूषकः—ऐकग्गचित्तदा खु वाअंपि तह पवट्टावेदि[1] ।

पीठः—न केवलं नाममात्रेण तस्याश्चेतोविपर्यासः । एवं च खल्वसौ सखीं वदति । यथा ।

संकल्पैस्तव पुरःस्थितेव बहुशस्तं विप्रलब्धासि ते
कांतेनेति शुचा निवारयसि मां प्रत्युत्थितां संप्रति ।
याचे त्वामयमंजलिः प्रियसखि प्रत्यागते वल्लभे
साक्षादागतवानसाविति शनैः कर्णे तदा मे वद ॥ २८ ॥

रामः—अहो संकल्पानां दृढिमा ।

विदूषकः—उभयं खु विरहिआणं पिअजणसमाअमसोक्खं जणेइ संकप्पा णिद्दा अ[2] ।

पीठः—कुतः खलु तस्या निद्रागमः । एवं तु पुनर्निद्रार्थिनीं सखीं व्याहरति यथा ।

निद्रायै प्रयते यथा पुरमहं त्वं चालिपार्श्वे स्थिता
त्वं स्वप्नागतमार्यपुत्रमुचितं विज्ञाय विज्ञापय ।
स्वस्ति स्वागतमंग पश्य भवत कांतामिमामीदृशीं-
तद्यावद्वचनादतः परमितस्त्वं धीरमागा इति ॥ २९ ॥

रामः—अहो संभावनीयमेतन्मौग्ध्यं ।

---

१ एकाग्रचित्तता खलु वाचमपि तथा प्रवर्तयति । २ उभयं खलु विरहवर्तिनां प्रियजनसमागमसौख्यं जनयति संकल्पा निद्रा च ।

विदूषकः—कधं अतिमेत्तं किलंता मणोभवेण तत्तहोदी ।

षंढः—अयि भो रामदेव ।

किसलयलीलातरला थिसवलयविलासकोमलच्छाया ।
सा कुसुमवाणवाणा सारेण सदा समाविद्धा ॥ ३० ॥

विदूषकः—(सविस्मयं) वअस्स एक्काए वाआए संकिअं पाउदं भणइ एस वाआकुसलो अदो एत्थ खु संलप्पिअदि इत्थिआ पुरिसो अ ।

रामः—(सस्मितं) साधूक्तं ।

विदूषकः—अज्जं पकिदं चेअ अणुसरिअदु ।

षंढः—तथास्तु ।

विदूषकः किं वा वण्णिअदि दिट्ठा चेअ खु सा मए वअस्सदसा । जं एसरमणिज्जंपि कोइलकूचिदादिं उव्वेअणिज्जं मुणेइ ।

षंढः—युज्यत एतत् । इत्थमेव हि सा मन्मथार्ता सर्वां प्रार्थयते तथा ।

मूकाशोकमवेक्ष्य मे प्रियसखी जाता स्वयं सारिका
कर्तव्यं त्विदमेव संप्रति सखि प्राप्तं तवावश्यकम् ।
दत्वा विप्रलभस्व दाडिमफलं तं वाचदूकं शुकं
तूर्णं चोत्कुरु कोकिलानुपवनात्कोक्कूयमानानिमान् ॥ ३१ ॥

संभाव्यते एवैतत् ।

विदूषकः—ऐआरिसं दसं अणुहवंतीं तत्तहोदिं किं सिसिरोवआरेण पडिअवट्टुवेइ सहिअणो ।

---

१ कथमतिमात्रं क्लांता मनोभवेन तत्रभवती । २ वयस्य एकया वाचा संस्कृतं प्राकृतं भणत्येष वाक्कुशलः अत एव खलु संलप्यते स्त्री पुरुषश्च । ३ आर्य प्रकृतिरेवानुश्रियतां । ४ किं वा वर्ण्यते दृष्टैव खलु सा मया वयस्यदशा यदेष रमणीयमपि कोकिलकूजितादि उद्वेजनीयं जानाति । ५ एतादृशीं दशामनुभवतीं तत्रभवतीं किं शिशिरोपचारेण प्रत्यवस्थापयति सखीजनः ।

पंढः—एवं सा मुग्धा सञ्जीकृतशिशिरोपचारामपि सखीमुपालभते । यथा ।

यत्स्वेदांबुविनिग्रहाय सुतरां सञ्जीकृतं मे त्वया
खिद्यत्यद्य हि मां शुपादनिहितं तच्चंद्रकांतस्थलम् ।
तत्स्वेदप्रतिकारमस्य कुरु तैः कर्पूरचूर्णैर्मुहुः
शीतैः शीतलिकानिलैरपि सखि प्रागेव तद्वीजय ॥ ३२ ॥

रामः—अभिरूपोऽयमुपालंभः ।

विदूषकः—वैअस्स एआरिसिं तत्तहोदिं असमंसासेयंतो तुमं खु एत्थ उपालंभं अरुहेसि ।

पंढः—न खल्वसावुपालब्धव्यः । परंतु एवंगतिकव्यः । (रामं प्रति)

त्वं कल्याणिन् जगति कृतिनामेक एवाग्रगण्यः
संतापानामपि च न भवान् भाजनं तद्विधानाम् ।
दिष्ट्या दृष्टं न खलु भवता यत्पुरः शोकमूकं
सख्या चक्रं सततरुदिताकेकरोच्छ्वासचित्रम् ॥ ३३ ॥

रामः—(सस्मितं) सखि साधु त्वमुपालंभविमुखासि ।

विदूषकः—ऐअरिसस्स संदावस्स कहं उवसमं करोदुं सहिअणो ।

पंढः—स्वयं पुनरसौ सखिकृतां शिशिरक्रियामसहमाना शिशिरसंविधानकमन्यदुपदिशति । यथा ।

मामेयं सखि किं पुनः पुनरपि व्यर्थैः क्रियाकौशलैः
यक्ष्येहं शिशिरोपचारमपरं दत्तावधाना भव ।
चंद्रं स्नापय चंद्रकांतसलिलैश्चंद्रातपं चंदन-
क्षोदेन क्षिप वीजयाग्रकदलीपत्रेण चैत्रानिलान् ॥ ३४ ॥

---

१ वयस्य एतादृशीं तत्रभवतीमसमाश्वासयन् त्वं खलु अत्रोपालंभमर्हसि ।

२ एतादृशस्य संतापस्य कथमुपशमं करोतु सखीजनः ।

रामः—अहो अनीदृशं शिशिरकर्म ।

विदूषकः—हीद्धि हद्धि किं अदो वरं पडिवज्जह सहि[1] ।

पीठः—इत्थं तु साखि पुनरपि लपति । यथा ।

वक्त्रं ते प्रतिबिंबितं मरकतस्निग्धेम्बरे नो शशी
दृंताशुर्विशदैरपांगकिरणैर्मिश्रो न चंद्रातपः ।
निःश्वासाः प्रसरंति तापविषमा दीर्घा न मंदानिलाः
कष्टं किं प्रति संप्रति प्रियसखि त्वं विद्रुवा क्लाम्यसि ॥ ३५ ॥

रामः—समुचितोयमपलापः । सखिजनायत्तं खलु विरहिणीनां जीवितम् ।

विदूषकः—कहं सु इत्थंभूदंपि अप्पाणं समस्सासेतं वअस्सं तत्तहोदी समस्सासइस्सिदित्ति विस्ससेदुं[2] ।

पीठः—एवमेतत् । (रामं प्रति)

विरतस्त्वयि विश्वासः सख्याः शठ दुःसहोघनिःश्वासः ।
न कुतोपि समुच्छ्वासः कथय कथं तावदाश्वासः ॥ ३६ ॥

विदूषकः—कीं वा तिस्से आसासो जइ सिसिरोवआरंपि पडिदेसइ[3] ।

पीठः—न केवलं प्रतिद्वेष्टि इत्थं च सखीमनिच्छंतीं नियुंक्ते । यथा ।

किं मामित्थमुपेक्ष्यसे सखि मुधा निर्व्याजमुत्थीयतां
सद्यो मुद्रय कैरवाणि मधुपान् कुत्रापि विद्रापय ।
पाताले शशिनं निधेहि जलधौ ज्योत्स्नां समावर्जय
स्कंधे बंधय गंधसिंधुरपदस्तंभेषु मंदानिलान् ॥ ३७ ॥

---

१ हा धिक् हा धिक् किमतः परं प्रतिपद्यते । २ कथं खलु इत्थंभूतमप्यात्मानं समाश्वासयंतं वयस्यं तत्रभवती समाश्वासयतीति विश्वसितुं । ३ को वा तस्या आश्वासः यदि शिरोपचारमपि प्रति द्वेष्टि ।

विदूषकः—ईरिसं तत्तहोदिं पच्चक्खं पेक्खंतो सहिअणो एव्वं ताए सोअणिज्जो ।

रामः—समसुखदुःखो हि सखीजनः ।

पंढः—इत्थं खलु तस्याः सख्यः शोचंति । यथा ।

अंगेषु प्रतिबिंबितस्तव शशी संख्यामसौ लंघते
ज्योत्स्नेयं तव वंतकुंदमुकुलच्छायाभिरालेखिता ।
निश्वासैस्तव वर्द्धिता सुरभयो यासंतिका वायवः
कष्टं भो कथमित्थमत्रभवतीमाश्वासयामो वयम् ॥ ३८ ॥

विदूषकः—कहं अवत्थंतरं आरूढा तत्तहोदीए विरहावत्था ।

पंढः—(रामं प्रति) ।

अत्रालं बहु विप्रलप्य विरहावस्थोचितास्ताः कथाः
कल्याणाभिनिवेशिना कृतमिदं कार्श्यं कृशांग्याः शृणु ।
संवृत्तौ कठिनेतरौ स्तनतटौ कांत्याथशिष्टं वपुः
मध्यः क्वापि गतः प्रकोष्ठवलयं केयूरतामागतम् ॥ ३९ ॥

विदूषकः—कहं दुस्सहं से उत्तं ।

रामः—अव्यपदेश्यां खलु दशामारोपिता सीता विरहिजनोत्पातधूमकेतुना मकरकेतुना ।

पंढः—तत्र पृष्टतो मामुपसृत्य निर्गच्छंत्या प्रियसख्या विनीतया मद्यमुनीतं । सरसहरिचंदनक्षोदलिखितसंदेशवचनं केतकिकुसुमगर्भपत्रं दंतपत्रलीलापदेशेन मया समानीतं (इति कर्णादादायोपनयति) ।

रामः—(सौत्सुक्यमादाय वाचयति) ।

दंसणमेत्तंकुरिओ सब्भावेहिं सदा अ पल्लविओ ।
पस्स सुहेण कुसुमिओ अपि णाम फलेज्जइ कुसुमसरो ॥४०॥

---

१ ईदृशीं तत्रभवतीं प्रत्यक्षं पश्यन् सखीजनः एवं तया शोचनीयः । २ कथमवस्थांतरमारूढा तत्रभवत्या विरहावस्था । ३ कथं दुःसहं अस्या वृत्तं ।

पुनः पुनर्वाचयति (सोत्कंठमाकाशे लक्ष्यं बद्ध्वा) प्रिये जनकपुत्रि

अलमलं परितापपरिश्रमै-
स्तननिपीड्य मनः सुमनस्समम् ।
स हि फलेदचिरात्कुसुमायुधो
यदि भवेत् सफलं मम जीवितम् ॥ ४१ ॥

विदूषकः—किं[1] अवरं एत्थ विलंबिअदि अवलंबिदं सु वअस्सेण तत्तहोदिं समस्सासेदुं । मंतव्वं ।

घंटः—(रामं प्रति) ।

यद्यपि गमिष्यति भवान् भवदागमनोत्सवप्रबोधाय ।
स्पंदितुमपि न क्षमते वामाक्ष्या वाममप्यक्षि ॥ ४२ ॥

विदूषकः—एदं[2] पि उद्दीवणं तत्तहोदो गमणं तराए ।

घंटः—

सख्याः किं बहुना त्वमेव शरणं किं चान्यदाकर्ण्यतां
काले धीर विलंबसे किमपरां सोयं समीपस्तव ।
स्त्यायच्चंदनपंकपंकिलविसव्यामुग्धमुक्तालता—
लीलानिर्भरविभ्रमस्तनभराभोगोपभोगोत्सवः ॥ ४३ ॥

रामः—(घंटं प्रति) ननु त्वदेकशरणोऽयं जनः तत्कथय किमत्रौपयिकं ।

घंटः—स्वामिन्नस्यैव माधवीवनस्य दक्षिणतः पुष्पवाटिकामुत्तरेण पाश्चात्येन प्रमदवनपक्षद्वारेण प्रविश्य प्रदोषसमयेव तमालवीथिकया निभृतं भवद्भिश्चंद्रकांताधारागृहमासादनीयम् ।

रामः—यदाह भवान् ।

---

१ किमपरमत्र विलंब्यतेऽवलंबितं खलु वयस्येन तत्रभवतीं समाश्वासितुं तव्यं । २ एतदपि उद्दीपनं तत्रभवतो गमनं त्वरायाः ।

विदूषकः—जुत्तं आवक्खिअं अज्जेण दाणिं पउत्ता मज्झण्हसंझा अदिक्कामदि भोअणवेला ता जाव गच्छेम्मो[1] ।

रामः—यद्भवते रोचते ।

षंढः—यदाह भवान् ।

(सर्वे उत्तिष्ठंति)

षंढः—(निर्वर्ण्य) अहो निर्जंहिमतया अजीरितजगज्जडो जरडातपस्तपनः । अद्य हि ।

क्षपितजलदावलेपे नभःस्थले घर्मवीचितौ तपति ।
घर्मजलमेव केवलमवशिष्टं निर्जले जगति ॥ ४४ ॥

रामः—

द्विरेफमिथुनं द्रुतं कमलिनीदलानामधः
स्थितं भजति पंकजं रविकरैरसंतापितम् ।
तमालतरुपादमूलमधिशेरते बर्हिणः
पिपासुरुपसेवते मृगगणोपि धारागृहम् ॥ ४५ ॥

(निष्क्रांताः सर्वे)

इति श्रीभट्टगोविंदस्वामिनः सुनुना हस्तिमल्लेन विरचिते
मैथिलीकल्याण नाम्नि नाटके तृतीयोऽङ्कः ॥ ३ ॥

---

१. युक्तमाख्यातमार्येणेदानीं पुनः प्रवृत्ता मध्याह्नसंध्यातिक्रामति भोजनवेला तस्माद्यावद्गच्छामः ।

चतुर्थोऽङ्कः ॥ ४ ॥

(ततः प्रविशति चेटी)

चेटी-(निर्वर्ण्य) अहो इमस्स सुहसेविदामंदवाअत्थसीअलपदोसाणिलकअपरिरंभस्स पुणरुत्तविवड्ढंतपुप्फाउहसरंभस्स पदोसारंभस्स । दाणिं खु सायंतणधूविज्जंतकालाअरुधूवकसणा कसणकज्जलाधिवासिदे विअ कव्वुरे अंबरे उदअराअकल्लायस्सोदसम्माणिदा पडिवालेदि रोहिणीपदिं तिमिरच्छद्दच्छण्णीलकोसेअओगुंठिएण णातिपरिफुडलक्खिज्जंततारागणमोत्तहारा पुव्वदिसा । (विलोक्य) एसो अ दाणिं उदिओ णिरंतरुप्फुल्लरत्तकं-

---

१, अहो अमुष्य सुखसेविता मंदवाता शीतलप्रदोषानिलकृतपरिरंभस्य पुनरुक्तविवृद्धपुष्पायुधसंरंभस्य प्रदोषारंभस्येदानीं खलु सायंतनधूमायमानकालागुरुधूपकृष्णा कृष्णकज्जलाधिवासिते इव कर्बुरेम्बरे उदयरागकादमीरक्षोदसंमानिता प्रतिपालयति रोहिणीपतिं तिमिरच्छटाच्छन्नीलकौशेयावगुंठितेन नातिपरिस्फुटलक्ष्यतारागणमुक्ताहारा पूर्वदिक्। २, एष चेदानीमुदितो निरंतरोत्फुल्लरक्तकंकेलिकुसुमस्तवकविभ्रमो विरहिजनधैर्यनिःशेषनिर्मोटनखंडाशनिसन्निभः विघटितमिथुनमानग्रहजनितरोषरंजितवचनमिव मन्मथस्य सज्जीकृत इवाधिकवाससौगंधिकमालाबंधज्योत्स्नामधुरसपानशौंडानां चकोरमिथुनानां प्रतिष्ठितनिजमुखकोतिलब्धशोभातिशय इव मणिदर्पणरीत्या अमृतमथनरभसभंगोत्थित इव मंदरगिरिशिखरस्थितसीकरविष्णुचूडामणिकिरणवासनाद्रघृणक्षोणिमेव शेषफणिफणामंडलं । स्तनांशुकापचारित एकस्तनायाः इतर इव कुंकुमपंकपंकिलो स्तनः ज्योत्स्नावप्नः जलनिधितरंगविक्षिप्त इव प्रवालप्रभापाटलितः शंखः दिनकरविरहपरितापितायाः स्तनागरागार्द्रीकृत इव शिशिरोपचारकमालिनीपत्रं गगनलक्ष्म्याः हरिचंदनतिलकमिव निषधगिरिगजवरस्य कीडाकंदुक इव निशाधिनीकन्यकाया अनंगविजयडिंडिमपुष्करप्रवृत्तवर्तुलः पद्मनाभनाभिसरः प्रस्कंदमिव हेमपुष्करं कामुकजनमनोरथपरिवर्तनैकस्थागभूतः मकरध्वजविजयरथांगभूतः सिंधूरित इव ऐरावणकुंभः लावण्यरसविधानरत्नकुंभो अंभोजिनीशत्रुः । अद्य हि कमलोदरगृहाभ्यंतरनिर्गता मुद्रितकलहंसनूपुररवा विष्कांतसारसरसना सीता प्रतिनवसमागमरसरसिका अभिसारयति तत्कालसमुद्भवंतं कुमुदाकरं लक्ष्मी ।

केलिकुसुमथवअविब्भमो विरहिजणधीरसेलणिम्मोडणखंडासाणिसण्णहो । विहडअमिहुणमाणगहजणिदरोसरंजिअवअणं विअ मम्महस्स सज्जीकओ-विअ अधिवाससोगंधिअमालबंधो ज्योण्हा मधुरसपाणसुंडाणं चओरमिहुणाणं पडिट्ठिअणिअमुहकंतिलद्धसोहादिसओ विअ माणिदप्पणो राईए अमअमहणरभसभंगुट्ठिओ विअ मंदरगिरिसिहरट्ठिओसीअरोविण्हुचूडा-मणिकिरणवासणादिउणसोणिमं विअ सेसफणिफणामंडलं थणंसुओवारिअकत्थणाए इदरो विअ कुंकुमपंकपंकिलोत्थणो जोहणावहुए जलणिहितरंगविक्खित्तो विअ पवालपहापाडलिओ संखवो दिणअरविरहपरिदाविदाएं थणं-विअ सिसिरोवआरकमलिणिपत्तो गअणलच्छीए हारिचंदणतिलअं विअ णिसहगिरिगअवरस्स । किट्ठाकंदुओ विअ णिसिहिकण्णाए अणंगविजअ-डिंडिमपोक्खरपवड्ढबहुलो पदुमणाहणाहिसर परूढं विअ हेमपोक्खरं कामुअ-जणमणोरहपरिवड्ढणेक्करहंगभूदो मअरद्धअविजहरहंगभूदो सिंधूरिओ विअ एरावणकुंभो । लावण्णरसणिहाणरअणकुंभो अंभोइणीसत्तू । अज्ज हिं कमलोअरघरब्भंतरणिग्गया मुद्दिअकलहंसणेउर रवा विसंतसारसरसणा रसीआ पडिणवसमा अमरसरसिआआभिसारेइ तक्कालसमुच्छसंतं कुमुदाअरं लच्छि (विचिंत्य) ऐअं च सव्वं मे उपआरअं सिसिरोअवआरकिरि-आए । जाव सज्जीकअसिसिरोवआरं सज्जिअं चंदअंतदारघरअं णिवेदेमि भट्टदारिआए कहिं खु दाणि सा वट्टइ ।

(ततः प्रविश्यापरा चेटी)

चेटी—आणत्तम्हि भट्टिदारिआए सीदाए जह हंजे सुउमारिए बलवई खु मे दाणिं सीसवेअणा को कालो अ चंदअंतदारादरअं सज्जीकाउं

१ एतच्च सर्वं मे उपकारकं शिशिरोपचारक्रियायाः यावत्सज्जीकृतशिशिरोपचारं सज्जितं चंद्रकांतदारागृहं निवेदयामि भट्टदारिकायाः। कस्मिन् खल्विदानीं सा वर्तते। २ आज्ञप्तास्मि भर्तृदारिकया सीतया यथा सुकुमारिके बलवती खलु मे इदानीं शिरोवेदना कः कालश्च चंद्रकांता द्वारागृहं सज्जीकर्तुं गतायाः प्रियसख्याः कौमुदिकायाः। तस्मात्त्वया शीघ्रं ज्ञात्वागंतव्यमिति यावत्तस्मिन् गच्छामि ।

गआए पिअसंहिए कौमुदीआए। ता तुए सिग्घं आणिअ आअंतव्वंति जाव तहिं गच्छेमि। (परिक्रामति)

प्रथमा—(विलोक्य) कौं उण एसा इदो अभिवट्टइ (निरूप्य) कहं पिअसहि सुहुमारिआ।

द्वितीया—(दृष्ट्वा) कहं पिअसहि कौमुदीआ।

प्रथमा—सहि कुदो आअच्छसि।

द्वितीया—हैला कौमुदीए अहं तु इदो आअच्छंतीए तुमं चिराअसित्ति दाणिं दु भट्टदारिआए अग्गदो णिउत्ता। किं तुए सज्जीकअंतं धाराघरअं।

प्रथमा—ओम।

द्वितीया—हैला चिट्ठदु एअं को णु एसो भट्टिदारिआए संदाओ जो सिसिरोवआरेहिंपि पज्जहं वड्ढदि।

प्रथमा—रहस्से खु दाव अप्पावि संकिदव्वो।

द्वितीया—एव्वं एदं तहवि रहस्सेति भणंति। अइमेत्तं मं ऊसिएसि।

प्रथमा—कहं वा पिअसहिए रहस्सं रक्खेमि सुणाहि दाव।

द्वितीया—अवहिदाम्हि।

---

१ का पुनरेषा इतो अभिवर्तते। २ कथं प्रियसखी सुकुमारिका। ३ कथं प्रियसखी कौमुदीका। ४ सखि कुत आगच्छसि। ५ सखि कौमुदिके अहं खलु इत आगच्छंत्यास्त्वं चिरायसीतीदानीं तु भर्तृदारिकया अग्रतो नियुक्ता। किं त्वया सज्जीकृतं तद्धारागृहं। ६ ओम् (स्वीकारे)। ७ सखि तिष्ठत्वेतत् का नु एषो भर्तृदारिकायाः संतापो यः शिशिरोपचारैरपि प्रत्यहं। ८ रहस्ये खलु तावदात्मापि शंकितव्यः। ९ एवमेतत्तथापि रहस्यमिति भणंति। अतिमात्रं मामुत्सुकयसि। १० कथं वा प्रियसखी रहस्यं रक्षामि शृणु तावत्। ११ अवहितास्मि।

प्रथमा—हंजे एवं खु अहं तुमं विअ पुणो णिब्बंधिअ पुच्छंति पिअसहीए भणिदम्हि कलावईए जह सहि कोमुदीए पुव्वं खु वसंतदोलारोहणदिणे कामदेवघरब्भंतरे दिट्ठो भट्टदारिआए भट्टा रामो पुणो अ माहविवणे अप्पम्हि उक्कंठंतो दिट्ठो सो एव्व दाणिं भट्टिदारिआए संदावहेउत्ति ।

द्वितीया—हंला जुंजइ ।

प्रथमा—हंला किं दाणिं अम्हे भट्टिदारिआपासं गच्छेमो आदु चंदअंतधाराघरं एव्व पडिवालेमो ।

द्वितीया—एव्वं खु अहं पिअसहिए भणिदम्हि विण्णीदाए जह सहि सुउमारिए बहुजणपलावं ण सहइ सीसवेअणादिरेअदो भट्टिदारिआ ता सहिअणंपि सव्वं पमअवणदुवारे एव्व णिसिहेहित्ति ।

प्रथमा—तेणं हि तुमं तं णिओअं अणुचिट्ठ, अहं पि सज्जीकअं धाराघरअं भट्टिदारिआए णिवेदेमि ।

द्वितीया—सेहि तह ।

(निष्क्रांते)

---

१. सखि एवं खलु अहं त्वमिव पुनर्निबंध्य पृच्छंति प्रियसख्या भणितास्मि कलावत्या यथा सखि कौमुदिके पूर्वं खलु वसंतदोलारोहणदिने कामदेवगृहाभ्यंतरे दृष्टो भर्तृदारिकायाः भर्ता रामः । पुनश्च माधवीवने आत्मनि उत्कंठमानो दृष्टः स एवेदानीं भर्तृदारिकासंतापहेतुरिति । २ सखि युज्यते ! ३ सखि किमिदानीमावां भर्तृदारिकापार्श्वं गच्छाव अथवा चंद्रकांतधाराग्रहे प्रतिपालयावः । ४ एवं खल्वहं प्रियसख्या भणितास्मि विनीतया यथा सखि सुकुमारिके बहुजनप्रलापं न सहते शीर्षवेदनातिरेकतः भर्तृदारिका तस्मात्सखिजनमपि सर्वं प्रमदवनद्वारे निषेधयेति । ५ तेन हि त्वं तं नियोगमनुतिष्ठ अहमपि सज्जीकृतं धाराग्रहं भर्तृदारिकाया निवेदयामि । ६ सखि तथा ।

(ततः प्रविशति सीता विनीता चेटी च ।)

सीता—हंजे कोमुदीए किं साहु सज्जिअं चंदअंतधाराघरअं ।

चेटी—किं ण सज्जीकरेइ चंदअंतधाराघरअं कोमुदीआ ।

विनीता—हैला साहु भणिअं जाव तुमं गदुअ जह भट्टिदारिआ सीसवेअणं सुणिअ ण किलम्मइ भट्टिणि वसुहा जहि तहि वा विहारावदेसणिवेदणेण अणिव्विण्णं करेहि ।

चेटी—जं पिअसहि भणादि । (निष्क्रांता)

विनीता—इदो इदो भट्टिदारिआ ।

(उभे परिक्रामतः)

विनीता—एअं पमदवणं जाव पविसम्ह ।

(उभे प्रविशतः)

सीता—(विचिंत्य) पिअसहि किं इमो अम्हाणं उज्जोवो कदाइअमोहो आदु हिअअस्स एस मोहो ।

विनीता—भट्टिदारिअं एवं णिउज्जंतो मअणो भट्टिणंपि तुरिदं तुह पाहुडिअं कुणइ ।

सीता—संहि दुस्सहं खु तवइ चंदादवो जाव एअं परिहरंतिअ इमाए

---

१ सखि कौमुदिके किं साधु सज्जितं चंद्रकांताधारागृहं । २ किं न सज्जीकरोति चंद्रकांतधारागृहं कौमुदिका । ३ हला साधुभणितं यावत्त्वं गत्वा यथा भर्तृदारिका शीर्षवेदनां श्रुत्वा न क्लाम्यति भट्टिनी वसुधा यत्र तत्र वा विहारापदेशनिवेदनेन अनिर्विण्णां कुरु । ४ यत् प्रियसखी भणति । ५ इत इतो भर्तृदारिका । ६ एतत्प्रमदवनं यावत्प्रविशामः । ७ प्रियसखि किमियमस्माकयोगः कदाचिदमोघो अथवा हृदयस्यैष मोहः । ८ भर्तृदारिकामेवं नियुंजन् मदनः भर्तारमपि त्वरितं तव प्राघूर्णिकं करोति । ९ सखि दुस्सहं खलु तपति चंद्रातपो यावदेनं परिहृत्य अस्याः पृष्ठायाया बकुलवाटिकायाः छायां गच्छामि ।

पच्छाआए वउलवालिआए च्छाहिं गच्छेमि (तथा परिक्रम्य) सहि सो एत्थ वरं चंदादओ एत्थ खु उवरि णिवडंतेहिं कुसुमबाणविजयवाणेहिं विज्झेदि वउलकुसुमेहिं मे सरीरं ।

विनीता—(अग्रतो निर्दिश्य) एअं चंदअंतधाराघरअं जाव पविसम्म

सीता—सहि तह ।

(प्रविशतः)

विनीता—भट्टिदारिए एअं सव्वदो सज्जीकअसिसिरोवअरं णिस्संदजंतधारासहस्सं चंदअंतधाराघरअं एसा अ एत्थ तमालपल्लवसज्जा । जाव इदं एव्व तुह संताओ अवणिज्जदु ।

सीता—जं पिअंसहि भणादि । (उपविश्य) हंजे विणिदे एताइ तमालदलाइ दलंतीव हिअअं उम्हाअंताए ।

विनीता—तेणँ हि इमाइ चंदणपल्लवरसेण सिंचेमि । (तथा करोति)

सीता—हंजे णिप्पीडिदं विअ चंदणपल्लवेहिं सह मे हिअअं ।

विनीता—जाव इमाए गंधणीहारेण सिंदाए जलंदाए वीजेमि । (तथा करोति)

सीता—हंला गंधणीहारसेअदो सिण्णं मे सरीरं ।

---

१ सखि स एव वरं चंद्रातपः अत्र खलूपरि निपतद्भिः कुसुमबाणविजयबाणैः विध्यते बकुलकुसुमैः मे शरीरं । २ एतच्चंद्रकांताधाराग्रहं यावत्प्रविशामः । ३ सखि तथा । ४ भर्तृदारिके एतत्सर्वतः सज्जीकृतं शिशिरोपचारं निष्यंदयन् यंत्रधारासहस्रं चंद्रकांतधारागृहं एषा चात्र तमालपल्लवशय्या । यावदित एव तव संतापमपनयतु । ५ यत् प्रियसखी भणति । ६ हंजे विनीते एतानि तमालदलानि दलंतीव हृदयं औष्मलतया । ७ तेन हि इदानीं चंदनपल्लवरसेन सेचयामि । ८ हंजे निष्पीडितमिव चंदनपल्लवैस्सह मे हृदयं । ९ यावदनया गंधनीहारेण स्निग्धया जलार्द्रया वीजयामि । १० हला गंधनीहारसेकात् शीर्णं मे शरीरं ।

विनीता—(स्पृष्ट्वा) कहं एसो गंधणीहारो से दुब्भेदो परिणदो जाव इमेहिं कप्पूरचुण्णेहिं पडीकरेमि । (तथा करोति) ।

सीता—हंजे चुण्णेदि मे हिअअं कप्पूरचुण्णं ।

विनीता—तेण हि इमिणा मोत्तापलक्खोदसलिलेण केलिपत्तेण वीजामि (तथा करोति)

सीता—हला एअं मोत्तिअखोदधवलिअधारं केलिपत्तं असिपत्तं विअ अणंगस्स उल्लसंतं पेक्खंति मामादि मे आदा ता जाव तं अण्णदो वेक्खिअ अहव मा सु तं मुंच एसो खु जंताणिवहंतचंद्रअंतणीसंदमंद-हुंकारमुच्छिदो मं दाणिं मंदाणिलहदवो जाव तेण कअलीपत्तेण एअं मलआणिलं पडिवीजंती अण्णदो ओसरेहि ।

विनीता—कहं एस णिवारिज्जइ सदागई जाव इमिणा चंद्रअंतणिस्संद-पलाविदेण कल्लहारदलेण तुवं वीजामि । (तथा करोति)

सीता—हंजे चंदअंतणिस्संदावदेसेण णिस्संदहि मे हिअअं जाव कम-लिणीपत्ताइ समप्पेंति पडिअवच्छावेदि ।

---

१ कथमेष गंधनीहारः अस्या दुर्भेदः परिणतः यावदेभिः कर्पूरचूर्णैः प्रतिकरोमि । २ हंजे चूर्णयति मे हृदयं कर्पूरचूर्णं । ३ तेन हि अनेन मुक्ताफलक्षोदसलिलेन कदलीपत्रेण वीजयामि । ४ हला मौक्तिकक्षोदधवलितधारं कदलिपत्रं असिपत्रपत्र-मिवानंगस्योल्लसत् पश्यंत्याः विभेत्यात्मा तस्मात्तावत्तदन्यतो विक्षिप । अथवा मा खलु तन्मुंच एष खलु यंत्रनिपतच्चंद्रकांतनिष्यंदमंदहुंकारमूर्च्छितो मूर्छयति मामिदानीं मंदानिलहृतकः यावत्तेन कदलीपत्रेणैतं मलयानिलं प्रतिवीजंती अन्यतोऽपसारय । ५ कथमेष निवार्यते सदागतिः यावदनेन चंद्रकांतनिष्यंदप्रक्षालितेन कल्हारदलेन त्वां वीजयामि । ६ हंजे चंद्रकांतनिष्यंदापदेशेन निष्यंदते मे हृदयं यावत्कमलिनी-पत्राणि समर्पयंती पर्यवस्थापय ।

विनीता—(तथाकुर्वती) कहं मुणालिणीपत्ताइ अधिगमिअ अंगहत्थोवि मे उम्महाविज्जई। जाव संदावसुक्खपेरंताइ सिंचेमि मुणालिणीपत्ताइ एआइलरसेण। अहव ताइ सूखाइ मुणालिणीपत्ताइ परिच्चइअ चंदकलाकोमलाइ मुणालाइ इमिए अंगेसु समप्पेमि। (तथाकरोति)

सीता—हैला एआइ विसकंदाइ सच्चे विसकंदाइ।

विनीता—किं दाणिं करेमि होदु जाव इमाए अंगेसु भरिआइ एआइ सकुसुमाइ उप्पलकुसुमकंडाइ समप्पेमि। (तथा करोति)

सीता—हंजे एदे खु णं उप्पलकुसुमकंदा कुसुमबाणस्स कंदा ता किं तुए करिअदि।

विनीता—कहं विदेहोवि सअं दड्ढुम्मम्महो दहइ अअं विदेहपुत्तिं (सचिंतं) हं किं करिस्सं होदु जाव एदाइ मोत्तिअसराइ संतप्पेंती लघुकरेमि इमाए संदावं। (तथा करोति)।

सीता—हला विणीदे एदे खु सरा सरा एव्व मम्महस्स।

विनीता—भट्टदारिए पेक्ख दाव देवस्सामहुरं कोमुदी गअणगंगं उडुवेण विअ अलंकरिज्जंतं उडुवेण।

---

१ कथं मृणालिनीपत्राणि अधिगम्यागृहस्तोपि मे औष्ण्यायते यावत्सन्तापशुष्कपर्यंतानि सिंचयामि मृणालिनीपत्राणि एलादलरसेन। अथवा तानि शुष्काणि मृणालिनीपत्राणि परित्यज्य चंदकलाकोमलानि मृणालानि अस्या अंगेषु समर्पयामि। २ हला एतानि बिसकंदानि सत्यं बिषकंदानि। ३ किमिदानीं करोमि भवतु यावदस्या अंगेषु भरितानि एतानि सकुसुमानि उत्पलकुसुमकांडानि समर्पयामि। ४ हंजे एते खलु ननूत्पलकांडाः कुसुमबाणस्य कांडाः तस्मात्त्वया किं क्रियते। ५ कथं विदेहोऽपि स्वयं दग्धमन्मथः दहत्ययं विदेहपुत्रीं। ६ अहं किं करिष्यामि भवतु यावदेतान् मौक्तिकशरान् संतर्पयंती लघूकरोमि अस्याः संताप। ७ हला विनीते एते खलु शराः शरा एव मन्मथस्य। ८ भर्तृदारिके पश्य तावत् प्रेक्षामधुरां कौमुदीं गगनगंगां उडुपेनेवालंक्रियमाणां उडुपेन।

सीता-हला इमस्सिं अवारे चंदिकासमुद्दे मज्जंतं अलद्धुच्छासं अप्पाणं धारेदुं ण पारेमि ।

विनीता-हंद्धि हद्धि ।

सीता-सहि सव्वंवि सहिदुं सक्कत एस पुण अणण्णसाहारणं खु मोहेइ मं चंदमोहो ।

विनीता-(सखेदं) कहं हरिणी वेधेण विअ चक्कोरिए चंडादवेण विअ चंदादवेण संधुक्खिदो इमाए संदावो ।

सीता-(संतापमभिनीय) संदावस्स तवति पडिआरो जइ खु कोमुदी एव्व सहि भण्णए एत्थ अण्णो पडिआरो कोमुदी एव ।

विनीता—भट्टिदारिए दक्ख एदं खु गअणगंगाए सुरदंतिदंतवलिहाघादेण अंताणुभिण्णा दीग्गवट्टं विअ विभाइ पवट्टिअकोमुदीणिम्मलजलपवाहविक्खित्तणक्खत्तबुब्बुदजालं अमअमऊखबिंबं ।

सीता—हला एअं चंदहदअं णिज्झाअंतीए चंदअंतोवलं विअ मे लोअणजुअलं होलजलाविलं ।

विनीता—तेण हि मुणालहारपत्तबंधं जलपेडलं अच्छिसु कपोलेसु थणेसु अ समप्पंति अदिवाहेहि परिदावं (उपनयति) ।

---

१ हला अस्मिन्नपारे चंद्रिकासमुद्रे मज्जंतमलब्धोच्छ्वासमात्मानं धर्तुं न पारयामि । २ हा धिक् हंत । ३ सखि सर्वमपि सोढुं शक्यते एष पुनरनन्यसाधारणं खलु मोहयति मां चंद्रमयूखः । ४ कथं हरिणी व्याधेनेव चकोर्याः चंडातपेनेव चंदातपेन संधुक्षितः अस्याः संतापः । ५ संतापस्य तपति प्रतीकारो यदि खलु कौमुद्येव सखि भण्यतेऽत्र अन्यः प्रतीकारः कौमुद्येव । ६ भर्तृदारिके पश्य एतच्च खलु गगनगंगायाः सुरदंतिदंतपरिघाघातेनांतरद्विन्नं छिन्नवृत्तमिव विभाति प्रवर्तितकौमुदीनिर्मलजलप्रवाहविक्षिप्तनक्षत्रबुद्बुदजालममृतमयूखबिंबं । ७ हला एतं चंद्रहृतकं निर्ध्यायंत्याः चंद्रकांतोपलमिव मे लोचनयुगलं बाष्पजलाविलं । ८ तेन हि मृणालहारपत्रबंधजलपत्रकं अक्षिषु कपोलेषु स्तनेषु च समर्पयंती अतिवाहय परितापं ।

सीता—(आदाय तथाकृत्वा) हला दाणिं खु मे अहिअं उग्गलंति अच्छिणीवाहं वाहं च ।

विनीता—हँद्धि ।

सीता—सँहि तं करेहि मे सीसवेअणपडिकरिअं ।

विनीता—तेण हि चंदणललाडिअं रचयेमि । (तथा करोति) ।

सीता—सँहि सअं विअ सीसवेअणा एस गोसीसलेओ ।

विनीता—भट्टिदारिए एअं विसतंतुदुउलवासिणीं मुणालाभरणदारिणीं दिण्णचंदणचच्चकीं केसरकिअत्थासअं मालदिमालधारिणीं आमुक्कमल्लि-आमउलभारं णोमालिआमालिआमेहलं चंदअंतपुत्तिअं आलिंगंती संदावं ते उद्धुणाहि ।

सीता—हँला सुट्ठु भणिअं (तथाकृत्वा) सहि चंदअंतपुत्तिए किं मइ-त्तोवि अहिअदरं तुइ णिद्दओ एस मम्महहदओ । जेण तुवं वि एवं णाम परिकरसिसिरोवआरा एआरिस संदावं उव्वहेसि ।

विनीता—भट्टिदारिए सिसिरोवआरो खु ण दे सिसिरोवआरो मण्णे सिसिरोवआरमोअणं व दाणिं सिसिरोवआरोत्ति ।

---

१ हला इदानीं खलु मे अधिकं दलंति अक्षिणीवादं वाष्पं च । २ हा धिक् । ३ सखि तत्कुरु मे शीर्षवेदनाप्रतीकियां । ४ तेन हि चंदनललाटिकां रचयामि । ५ सखि स्वयमिव शीर्षवेदनैषगोशीर्षलेपः । ६ भर्तृदारिके एतां विसतंतुदुकूलवासिनीं मृणालाभरणधारिणीं दत्तचंदनचर्चिकां केसरकृतस्थासकां मालतीमालाधारिणीमा-मुक्तमल्लिकामुकुलभारां नवमालिकामालिकामेखलां चंद्रकांतपुत्रिकामालिंगंती संतापं ते उद्धुनु । ७ हला सुष्ठु भणितं । ८ सखि चंद्रकांतपुत्रिके किं मत्तोपि अधिकतरं त्वयि निर्दयो मन्मथहृतकः येन त्वमपि एवं नाम परिकृतशिशिरोपचारा एतादृशं संतापमुद्वहसि । ९ भर्तृदारिके शिशिरोपचारः खलु न ते शिशिरोपचारः मन्ये शिशिरोपचारमोचनमेवेदानीं शिशिरोपचार इति ।

सीता—हंजे किं करोमि सव्वदोवलग्गं मअणसरासरो सरधि विअ खु मे आदा कुसुमाउहस्स ।

विनीता—को[2] अण्णो एसो आदा सरहि एव्व (इत्यर्धोक्ते)

सीता—(सहर्षं) कहिं कहिं अज्जउत्तो ।

विनीता—भट्टिदारिए एवं खु अहं वत्तुकामो को अण्णो एसो आदा सरहि एव्व दे आउंसणिमग्गपुप्फाउहबाणसहस्सोत्ति ।

सीता—हंतं कुदो मे तारिसा भाअदेआ जेण दाणिं अज्जउत्तो सअं आअदुअ अच्छीणं मे ऊसवं देइ ।

विनीता—भट्टिदारिए मा खु तह संतप्पिअ अवस्सं खु पिअसहि कलावई ण दे अण्णहा भणाइ त्ता एत्थ पविट्ठ एव्व जाणिहि भट्टिणिआ वइदो मुहुत्तअं पडिवालेम ।

(ततः प्रविशति रामो विदूषकश्च)

रामः—

तप्तव्योमा तपनकिरणैः वासरस्तु प्रकामं
संतापानां भवतु विषयो दुःसहानाममीषाम ।
सः स्यात्तस्यां निशि च शशिनो ज्योत्स्नया शीतलायां
चित्रं जातो द्विगुणितगुणो हंत संताप एषः ॥ १ ॥

---

१ हंजे किं करोमि सर्वतोवलग्नं मदनशरासारः शरधिरिव खलु मे आत्मा कुसुमायुधस्य । २ कोऽन्यः एष आत्मा शरधिरेव । ३ कस्मिन् कस्मिन् आर्यपुत्रः । ४ भर्तृदारिके एवं खल्वहं वक्तुकामा कोन्य एष आत्मा शरधिरेव ते आपुंखनिममपुष्पायुधबाणसहस्र इति । ५ हंत कुतो मे तादृशानि भागधेयानि येनेदानीमार्यपुत्रः स्वयमागत्य अक्ष्णोर्मे उत्सवं ददाति । ६ भर्तृदारिके मा खलु तथा संतप्य अवश्यं खलु प्रियसखिकलावती न तेऽन्यथा भणति तस्मादत्र प्रविष्ट एव जानीहि भट्टिन्या वदितो मुहूर्तं प्रतिपालयामः ।

विदूषकः—भो वअस्स पेक्ख पेक्ख मअरद्धअविजअरज्जाहिसे-असलिलप्पवाहस्स विअ सोहग्गं जोहणापूरस्स ।

रामः—(निर्वर्ण्य) हंत शोचनीयाः खलु विरहिणः । ते हि

प्रस्तर्पंतीं ज्योत्स्नां मदनविजयारंभरभसा
प्रमर्दोत्थां धूलिं किल वियति पश्यंति विधुराः ।
किमन्यं मन्यंते मलयगिरिशांताश्च पवनान्
सकोपं प्रोन्मुक्तान्यममहिषशूत्कारमरुतः ॥ २ ॥

विदूषकः—वअस्स किं ण णिव्वापेदि तुह हिअअं एसा णीहारविंदु-कोमला कंठावलंबिणी हारलदा ।

रामः—वयस्य मैवं पश्य ।

न सोऽयं शीतांशुर्जरठतपतप्तो रविरसौ
न चैषा ज्योत्स्नाया शिखि सुहृदसावातपशिखा ।
न चैते हारा यत्तरणिमणिमाला स्फुटमिमा
न चेदंगान्येषं प्रियसख तपेयुः कथमिव ॥ ३ ॥

विदूषकः—हंतँ कहं एसो वड्ढेदि संदावं वअस्सस्स वह्मबंधुकुमुदिणीबंधू ।

रामः—वयस्य आदेशय मार्गं प्रमदवनस्य ।

विदूषकः—ऐअं उत्तरदो माहविवणं एसा अ इमस्स दक्खिणदो पुप्फ-वाडिआ जाव इमाणं अंतरेण मच्छम्ह ता इदो पिअवअस्सो ।

(परिक्रामतः)

---

१ भो वयस्य पश्य पश्य मकरध्वजविजयराज्याभिषेकसलिलप्रवाहस्येव सौभाग्यं जोत्स्नापूरस्य । २ वयस्य किं न निर्वापयति तव हृदयं एषा नीहारबिंदुकोमला कंठा-वलंबिनी हारलता । ३ हंत कथमेष वर्धयते संतापं वयस्यस्य ब्रह्मबंधुकुमुदिनीबंधुः । ४ एतदुत्तरतो माधवीवनं एषा चास्य दक्षिणतो पुष्प वाटिका यावदनयोरंत-रेण गच्छावः तस्मादितः प्रियवयस्यः ।

रामः-(मदनावस्थां नाटयन्)।

निःशेषानथ यूयं पिबत विनिपतच्चंद्रपादांश्चकोरा
हे राहो व्यात्तवक्त्रः सकलमपि गिल त्वं सुधासूतिबिंबम्।
वातानाचूषतैनान्मलयजफणिनश्चंदनामोदसांद्रान्
गृण्हीत ज्या द्विरेफा मधुपूषितमुचः कौसुमान् कामबाणान्॥ ४॥

(विचिंत्य) अलमनया केवलमशोधितमूलया बहिर्जल्पलीलया। तदिदानीं मन्मथमेव मूलमनुशिष्मः। (आकाशे लक्ष्यं बद्ध्वा)

मनसिज विषयांस्तांस्त्वं मनस्विप्रणिधान्
जहिहि न हि गुणस्ते तेषु संसर्ग एषः।
न चरितमथवाहो तेऽन्यथा कर्तुमर्हं
भवति च मधुपानां यद्गुणस्ते गुणाय॥ ५॥

विदूषकः--वअस्स एदं पमदवणपच्छिमदुवारअं।

रामः--यावत्प्रविशावः।

(प्रविशतः)

विदूषकः--वअस्स णिव्विसेहि एअं जोण्हापूरतरंगं मं विअ सुहसिसिरपरिस्सं पओसाणिलं।

रामः--

तामिस्र एष पवनो विरहिजनोत्पातपांशुवृष्टिरिव।
उत्फुल्लकैरवरजो धूसरितस्सस्त्वमपहरति॥ ६॥

विदूषकः--वअस्स एसा खु सा तमालवीहिआ।

रामः--(निर्वर्ण्य) वयस्य पश्य।

---

१ वयस्य तत्प्रमदवनपश्चिमद्वारं। २ वयस्य निर्विश एतं ज्योत्स्नापूरतरंगं मामिव सुखिशशीरस्पर्शं प्रदोषानिलं। ३ वयस्य एषा खलु सा तमालवीथिका।

प्रच्छायरम्यासु तमालवास-
यष्टिष्वसौ वर्हिगणः शयानः ।
ज्योत्स्नालवैः पल्लवरंध्रदृष्टै-
र्विभाव्यते मेचकबर्हभारः ॥ ७ ॥

विदूषकः—(निर्दिश्य) वेअस्स एअं खु तं पल्लवकआलिखंभतोरण-रमणिज्जं धाराघरेअद्दुवारअं ।

रामः—(निर्वर्ण्य सस्पृहं)

शीतः कपोलार्पणदानयोग्य-
श्चंद्रातपस्यच्छदुकूलधौतः ।
प्रियोरुसाम्याद्विदधाति रंभा-
स्तंभो ममासौ परिरंभवांछाम् ॥ ८ ॥

विदूषकः—मा तुवं उवमामेत्ते उक्कंठेहि उवमेअं चेअ दाणि लहसि ।

रामः—तथास्तु ।

विदूषकः—वेअस्स दक्ख दाव जोहणीसवण्णं परिसाणुमेअं चंद-अंतणिस्संदपादं ।

रामः—वयस्य सम्यगुपलक्षितं । तथाहि ।

चंद्रोपलानां शुचिचंद्रकांता
निर्याणधारा गृहहर्म्यपृष्ठात् ।
निष्यंदधारा स्रवती प्रणाल्या
सुरस्रवंतीव हिमाचलाग्रात् ॥ ९ ॥

विदूषकः—अहो से सिरिअं ।

---

१ वयस्य एतत्खलु तत् प्ररूढकदलिस्तंभतोरणरमणीयं धारागृहद्वारं । २ मा त्वमुपमामात्रे उत्कंठस्व उपमेयमेवेदानीं लभसे । ३ वयस्य पश्य तावत् ज्योत्स्नाशवर्णं स्पर्धानुमेयं चंद्रकांतानिष्यंदपादम् । ४ अहो अस्याः सौंदर्यं ।

रामः—वयस्य यावत्प्रविशावः ।

विदूषकः—[1]इंदो दाव ।

(उभौ प्रविशतः)

विदूषकः—(दृष्ट्वा) [2]वैअस्स एसा खु अत्तहोदि सीदा विणीदासहिदा तुमं पडिवालेदि ।

रामः—(विलोक्य निर्वर्ण्य च) ।

समन्मथा मत्पतिपालनोत्सुका
मनोरथानां कुरुते परां धृतिम् ।
विचेष्टयंती परितापितां तनुं
तनूदरीयं तनुते शुचं च मे ॥ १० ॥

विदूषकः—पिअ[3]वैअस्स एहि उवसप्पम्म ।

रामः—वयस्य ममेदानीं तव सख्याः सीतायाः मन्निबंधनं विविक्त-संजल्पं श्रोतुं च सकौतुकं चेतः ।

विदूषकः—तेणं हि एत्थ एव्व मुहुत्तअं चिट्ठमो ।

रामः—सम्यगाह भवान् ।

(उभौ तथा कुरुतः)

सीता—(सनिर्वेदं) हलो विणीदे किं इमिणा अलद्धफलेण पडिवालणेण ।

विनीता—भट्टिदारिए मा तुवं सोइअ जह तुमं माहविवणे समस्सा-

---

१ इतस्तावत् । २ वयस्य एषा खलु अत्रभवती सीता विनीतासहिता त्वां प्रतिपालयति । ३ प्रियवयस्य एहि उपसर्पावः । ४ तेन हि अत्रैव मुहूर्तं तिष्ठावः । ५ हला विनीते किमनेनालब्धफलेन प्रतिपालनेन । ६ भर्तृदारिके मा त्वं शोचयित्वा यथा त्वं माधवीवने समाश्वसिता तत्कालसन्निहितेन भर्त्रा रामेण सम्प्रत्यानीमपि स त्वां समाश्वासयिष्यति ।

सिदा तक्कालसण्णिहिदेण भट्टिणा रामेण तह दाणिंवि सो तुमं सम स्सासइस्सिदि ।

सीता—को वा अदीवि परं समस्सासणकालो ।

विनीता— (आत्मगतं) जाव भट्टा आअच्छेदि दाव भट्टिदारिअं अणुऊलेण कीलावदेसेण विणूदेमि (प्रकाशं) भट्टिदारिए जाव माहविवणउत्तंतं अभिणअंतीए कंपि वेलं अदिवाहेमो ।

सीता—हला साहु भणिअं ।

विनीता—तेणं हि अहं भट्टा रामो होमि तुमं पुण भट्टिदारिआ चेअ होहि ।

सीता—हला जुत्तं आचक्खिअं ।

विदूषकः—कहं पुप्फगंधिआ पउत्ता ।

रामः—वयस्य निभृतमवलोकयामः ।

विनीता—(रामभूमिकां गृहीत्वा मदनावस्थामभिनीय) अहो मकरकेतनस्य रणरणिकशालिता ।

कुसुमवृष्टिरसौ कुसुमेषुणा
कुसुमचापधरेण निपातिता
विजयिनः पुनरस्य निपातिता
कुसुमवृष्टिरभूज्जयशंसिनी ॥ ११ ॥

---

१ को वा अतोपि परं समाश्वासनकालः । २ यावद्भर्तागच्छति तावद्भर्तृदारिकामनुकूलेन क्रीडापदेशेन विनोदयामि । ३ भर्तृदारिके यावन्माधविचनवृत्तांतमभिनयंत्यः कामपि वेलामतिवाहयामः । ४ हला साधु भणितं । ५ तेन हि अहं भर्ता रामो भवामि त्वं पुनर्भर्तृदारिकैव भव । ६ हला युक्तमारब्धा । ७ कथं पुष्पगंधिका प्रवृत्ता । ८ रणप्राचुर्यशालिता ।

विदूषकः—कधं इमाए कुंभदासीए जोरिओ वअस्सस्स सिणिद्धं धीरो सरो उदारं च सत्तं[1]।

रामः—संगीतकविदग्धा हि प्रायो राजकुलपरिचिता स्त्रियः।

सीता—(आकाशे) हला विणीदे अविदिअभावे तस्सिं जणे कधं ण लज्जेदि मे उक्कंठा[2]। किं भणासि मा संतप्पिअ तंपि तुमं विअ उक्कंठं तं चेअ दक्खिस्ससिसिति[3]।

कृतकरामः—(आकाशे) वयस्य गार्ग्यायण किं ब्रवीषि कियद्वा तत्कालः प्रतिपालयितव्यः यस्मिन्नेष संतापः शाम्यति इति (सस्मितं) वयस्य न दुर्जीतं ब्रूयतां। शरदुत्पुको न तृप्यति कलहंसः शरदि विप्रकृष्टायां सीतायिनोपि ननु मे न धृतिस्तस्यामदृष्टायां।

सीता—हला विणीदे किं भण्णासि दक्खस्स दाव एसो खु पुरदो भट्टा रामोत्ति तेण हि कियटुं मे चक्खू[4]। (दृष्ट्वा) अम्हो अज्जउत्तो[5]।

कृतकरामः—(आकाशे) वयस्य किं ब्रवीषि। इदमत्राश्चर्यं यदपहस्तिताखिलाशिशिरोपचारस्य भवतस्तत्रभवति शैशिर्यमापादयतीति (सनिर्वेदं तूष्णीमास्ते)।

सीता—(आकाशे) हँला किं भणासि किं दाणिं तुस्ससित्ति[6]।

कृतकरामः—(आकाशे) वयस्य किं ब्रवीषि अपृष्टेनापि त्वया सीतां प्रजल्पतः कुतः खलु पृष्टेनापि न सीताप्रसंगे दीयते प्रत्युक्तिरोति (सनिर्वेदं) किं तया।

---

१ कथमनया कुंभदास्या जोरितो वयस्यस्य स्निग्धो धैर्यः स्वर उदारं च सत्त्वं। २ हला विनीते अविदितभावे तस्मिन् जने कथं न लज्जसे मे उत्कंठा। किं भणसि मा संतप्य तमपि त्वमिवोत्कंठमानमेव द्रक्ष्यसीति। ३ हला विनीते किं भणसि पश्य तावत् एष खलु पुरतः भर्ता राम इति तेन खलु कृतार्थे मे चक्षुः। ४ अहो आर्यपुत्रः। ५ हला किं भणसि किमिदानीं तुष्यसीति।

सीता—(श्रुत्वा सखेदमिव) हंत[1] किं ताए इति मं विहत्थेइ । हंजे किं दाणिं एत्थ थीयदि ता गच्छम्ह अहव कहिं दाणिं मए गच्छिअदि । (मोहं नाटयति) ।

कृतकरामः—(कर्णं दत्वा) कथं स्त्रीजनसमाश्वासशब्दः ।

रामः—(सहसोपसृत्य संज्ञया विनीतां विनिवार्य) प्रिये समाश्वसिहि समाश्वसिहि ।

सीता—(समाश्वास्य दृष्ट्वा च सहर्षं सलज्जं चात्मगतं) कहं सअं चेअ परमत्थदो अज्जउत्तो । (मंतुमिच्छति) ।

रामः—(हस्ते गृहीत्वा) अयि मुग्धे ।

कृतव्यलीके प्रतिकूलया गिरा
मयि त्वया कोपरसोनुभावितः ।
विकुंचितं भ्रूलतिकं तदीक्षणं
क्षिप स्मरस्येदमपश्चिमं शरम् ॥ १२ ॥

विनीता—(विलोक्य) कहिं एअं बालचंदणतरुमूलालवालपरिपूरितवप्पं विलंघेइ चंदअंतदवपूरो जाव अण्णदो एअं पवट्टेमि ।

विदूषकः—होदि[4] सिग्घं संविहेअं खु तं जाव बालासोअमूले पवट्टेदव्वं अहं पि दे सहाओ होमि ।

(निष्क्रांता विनीता विदूषकश्च)

सीता—कहं पिअसहिवि एक्काइणिं मं परिच्चइअ गआ ।

---

१ हंत किं तयेति मां विहस्तयति । हंजे किमिदानीमत्र स्थीयते तस्माद्गच्छावः अथवा कस्मिन्निदानीं गम्यते । २ कथं स्वयमेव परमार्थतः आर्यपुत्रः । ३ कथमेतं बालचंदनतरुमूलालवालपरिपूरितवप्रं विलंघयति चंद्रकांतद्रवपूरो यावदन्यतो एतत्प्रवर्तयामि । ४ भवति शीघ्रं संविधेयं खलु तद्यावद्बालाशोकमूले प्रवर्तितव्यमहमपि ते सहायो भवामि । ५ कथं प्रियसखी मामेकाकिनीं परित्यज्य गता ।

रामः—नन्वयमहं ते परिजननिर्विशेषः संनिहितः ।

सीता—(लज्जां नाटयति, अन्यतो गंतुमिच्छति)

रामः—हस्ते गृहीत्वा निवारयन् ।

चिरस्य कालस्य समागते जने
तवाद्य किंचेति समाकुलोत्सुके ।
अभिज्ञयुक्तं विनिगूहनं न ते
सुनिर्दयं चंडि कुरूपगूहनम् ॥ १३ ॥

सीता—(अक्षस्थोचितं नाटयति) ।

रामः—(आत्मगतं) असाधारणरमणीयं खलु नववधूविग्रहं । तथाहि ।

कथमपि परिरब्धा यास्यसौ पश्यतो मे
मयि पुनरधरोष्ठं पातुकामे प्रसह्य ।
सकरुणमुपलाल्यं निर्दयं चाशु पेयं
प्रथयति मुखमंतर्धाप्यजिह्माकुलाक्षम् ॥ १४ ॥

विनीता विदूषकश्च—(सत्वरं प्रविश्योपसृत्य च) आअच्छइ एत्थ एक्का इत्थिआ ता किं करिदुं[1] ।

विनीता—भट्टा[2] तुम्हेहि एत्थ अंतरिदेहि होदव्वं ।

रामः—यथाह भवती ।

(तथा तिष्ठतः)

(प्रविश्य)

चेटी—जेदु भट्टिदारिआ[3] ।

सीता—सहि कोमुदिए कुदो आअच्छसि[4] ।

---

१ आगच्छति अत्रैका स्त्री तस्मात्किं क्रियताम् । २ हे भर्तः युष्माभिरत्रान्तरितैर्भवितव्यं । ३ जयतु भर्तृदारिका । ४ सखि कौमुदिके कुत आगच्छसि ।

चेटी—भट्टिदारिए एव्वं खु भट्टिणिए वसुहाए अहं आणत्ता जह होदि कोमुदीए को कालो पमदवणे विहारत्थं गआए वच्छाए सीदाए सीसिंव-अगदिं ण सुअं मए परिजणादो ता तुमं सिग्घं गदुअ तं इध आणेहि त्ति ता जह भट्टिणि ण किलम्मइ तह भट्टिदारिआ सिग्घं गंतव्वं ।

सीता—हं संकडे पडिअम्हि ।

विनीता—भट्टिदारिए तेण ही सिग्घं गंतव्वं ।

सीता—(आत्मगतं) हं अविणीदा खु विणीदा (प्रकाशं) जं पिअसहि भणादि ।

चेटी—इवो इदो भट्टिदारिआ ।

(परिक्रम्य निष्क्रांता सीता विनीता चेटी च)

रामः—(सोत्कंठं) अहो दुस्सहता प्रियाविरहस्य । अथ हि ।

अच्छिन्नपंक्तिशरसंधिकृताभिसंधि
पुष्पायुधस्य परितोपि विनिःपतंति ।
युंजत्फलानि विरहार्तविपत्फलानि
कुर्वन्त्यलं सुमनसो विमनस्कतां नः ॥ १५ ॥

विदूषकः—वअस्स समासण्णो दिअहारंभो अज्ज खु वाहणीदिसं वो-

---

१ भर्तृदारिके एवं खलु भट्टिन्या वसुधयाहमाज्ञप्ता यथा कौमुदिके कः कालः प्रमदवने विहारार्थं गतायाः सीतायाः वत्सायाः शीर्षवेदना इति च श्रुतं मया परिजनात् तस्मात्त्वं शीघ्रं गत्वा तामिह आनयेति तस्माद्यथा भट्टिनी न क्लाम्यति तथा भर्तृदारिकया शीघ्रं गंतव्यं । २ अहं संकटे पतितास्मि । ३ भर्तृदारिके तेन हि शीघ्रं गंतव्यं । ४ अहो अविनीता खलु विनीता । ५ यत् प्रियसखी भणति । ६ इत इतो भर्तृदारिका । ७ वयस्य समासन्नो दिवसारंभः अद्य खलु वाहनीदिशमवलंबमानः चकोरवारणानां दिनकरी कृष्णवर्णां ज्योत्स्नां मुंचन् पश्चिमजलनिधिवेलाविहाररसिक इवालंबते शीतांशुः ।

लंबंतो चओरवारणाणं दिअरी कसणवण्णं जोहणं मुंचंतो पच्चिमजलणिहि-वेलाविहाररसिओ विअ बोलंविज्जइ सीअंसु ।

रामः—कथं विभातप्राया विभावरी । संप्रति हि ।

विभातविश्लेषितचक्रवाकं
मंदं विभिंदन्नरविंदकोशान् ।
आघ्राति वायुर्विवसोत्सुकाना—
माश्वासनः कोककुटुंबिनीनाम् ॥ १६ ॥

विदूषकः—वअस्स जाव वअंपि गच्छेमो ।

रामः—यथा भवानाह (परिक्रामन्)

भवत भवत सर्वे निर्वृताश्चक्रवाका
दिवसकरकरास्त्रैस्ता निरस्ता तमिस्राः ।
भजत सह बधूभिः स्वैरसंभोगयोग्यान्
विकचदलकरंडानाशु तान् पद्मखंडान् ॥ १७ ॥

विदूषकः—इंदो पिअवअस्सो ।

(निष्क्रांतौ)

इति श्रीगोविंदस्वामिनः सूनुना **हस्तिमल्लेन** विरचिते
मैथिलीकल्याणनाटके चतुर्थोऽङ्कः ॥ ४ ॥

---

१ वयस्य मावद्वयमपि गच्छामः । २ इतः प्रियवयस्यः ।

पंचमोऽङ्कः ॥ ५ ॥



(ततः प्रविशति कंचुकी)

कंचुकी—(परिक्रम्य आत्मानं निर्वर्ण्य च) अहो वार्धकं नाम गुणाय संपद्यते । अहं हि—

वैषम्यदोषमधनौ परिहृत्य यत्ना-
दुच्छ्वस् क्रमावधिषमे पथि सावधानः ।
दंडेन शोभितनिदेशनिवेशितेन
बिभ्रत् स्थितिं धरणिपालधुरं दधामि ॥ १ ॥

अथवा का वा तत्र गुणग्रहता श्लाघ्या । तथाहि ।

रचयति जरा वाचं कंठे महाविव गद्गदां
स्खलति चरणद्वंद्वं मूर्ध्नोप्यहस्खलतः खलु ।
गलयति च वयस्तच्चांगं मे विधून्वविव स्वयं
चलति पलितं पाप्मा प्रागर्जितः फलितच्छलात् ॥ २ ॥

(सस्मितं) इयं पुनरपहता स्म दौर्जित्यसर्वस्वा जरत्कंचुकमात्रधारणं च न क्षमते तरुणजनसंमोहिनी जरापण्यांगना । (निर्वर्ण्य)

आशुल्फलंबाकुलवारवाणो
विश्लिष्टनिर्मोक इवास्मि भोगी ।
आश्लिष्टसर्वांग इवान्वहं हि
सुविग्रहिण्या च जरागृहिण्या ॥ ३ ॥

(विचिंत्य) आस्तां तावदियमसंस्तुतकथा आज्ञापितोस्मि महाराजजनकेन । यथा—आर्य गुरुदत्त यत्नभग्नरपरिपालितं दिव्यधनुर्यो हि नाम तदधिज्यं कुर्यादधिबलस्ततस्तेनैव वीर्यशुल्केन तस्मै वत्सा सीता प्रदातव्या । आहूताश्च तदर्थमेव सर्वेपि राजपुत्राः । तदिदानीं मद्वचनादमात्य-

संघं ब्रूहि । यथा अद्य खलु वत्सायाः सीतायाः परिणयनसमयः अद्यैव च राज्ञां धनुर्गुणारोपणपरीक्षणं । तत्सज्जीक्रियतां सभाभूमिः प्रवर्त्यतां च राज्ञां सभाभूमिसमासादनाय समुद्घोषणा, नियोज्यतां च धनुरानयनाय किंकराः । इत्थं चादिश्यता भवतापि पुनस्तत्रैव निर्वर्त्य वस्तुनि व्यापृतात्मना भवितव्यमिति । अनुष्ठितश्च मया स्वामिनो निदेशः । अद्य हि यथाहं संपादितमंगलकर्मतया गृहीतप्रतिकर्मेव कार्मुककर्मणकृत्यादेशभूमिः सभाभूमिः । तथाहि ।

एकांतवलद्रविणं प्रसाधिता सुलभयैव नोत्सेकम् ।
प्रतिपालयतीह नृपालकुलं सभाभूमिः ॥ ५ ॥

आनीतं च नभश्चरारक्षितैस्ताद्दिव्यं धनुः । अद्य हि ।

मध्यप्रतिष्ठापितदीर्घचाप—
दंडा सभाभूमिरसौ बिभर्ति ।
अंतः समुज्जृंभितशेषभोग—
भीमस्य शोभां भुजगालयस्य ॥ ५ ॥

(नेपथ्ये)

भो भो प्रौढबलावलेपगुरुताकंडूलदोर्गर्वला
राजानो नवयौवनोन्मदविरास्वादप्ररोहन्मदाः ।
वज्रावर्तमिदं धनुर्विघटयद्वज्रं बलिक्ष्माभृतो
युष्मानाह्वयते बलस्य निकषग्रावापरीक्षाक्षमः ॥ ६ ॥

कंचुकी—(कर्णं दत्वा) इयमिदानीं राजपुत्रान् समाजयितुं नगराध्यक्षैरुद्घोषणा क्रियते । (परितोऽवलोक्य) ।

केचिद्वद्धमनोरथा रथवरानध्यासिता भूभृतः
केचिद्दिक्करिहस्तकर्कशकराः सेवाकरीन्द्रस्थिताः ।
आरूढाश्चतुरंगजित्वरबलाः केचित्तुरंगोत्तमा—
नासीदेति दुरंतदुर्धमदा भूयस्सभाभूमिकाम् ॥ ७ ॥

अहं तु पुनरित्थं समर्थये ।

यस्य स्याद्बाहुरेकोऽप्यचलपरिदृढं मंदरं भोगिभोगै-
यस्य भ्रूक्षेपमात्रं क्षिपति जगदरिक्षत्रविस्रंसदक्षम् ।
रामेणारोप्यमाणं सभयमिव धनुस्तेन तत्स्यादधिज्यं
नोचेद्धस्यादधिज्यं ध्रुवमसहनसन्मानिभिर्वध्यमानैः ॥८॥

(विलोक्य) कौ पुनरिमौ ।

अन्योन्यमन्यूनमनोज्ञकांती
सह प्रयांताविव पुष्पवंतौ ।
इंद्रप्रतींद्राविव चावतीर्णौ
नेत्रे इव द्वे जगतां त्रयस्य ॥ ९ ॥

(निरूप्य) ।

सोऽयं रामः समासन्नः सीतोद्वाहो रघूद्वहः ।
सोऽयं प्रतिनिधिः कांत्या लक्ष्मणः शशलक्षणः ॥ १० ॥

यावदिदानीमितस्तावदहं महाराजाय निर्वर्तितं नियोगं निवेदयामि ।

(परिक्रम्य निष्क्रांतः)

शुद्धविष्कंभः

(ततः प्रविशति रामो लक्ष्मणश्च)

रामः—(सौत्सुक्यमात्मगतं) अहो प्रिया हि नाम जनस्य संमोहिनी विद्या । मम हि ।

तद्विंबाधरपानमीप्सितमुखं गात्रं तदाश्लेषणं
श्रोत्रे तद्वचनश्रुतौ व्यसनिते नेत्रे तदालोकने ।

घ्राणं तद्वदनारविंदसरसा मोदाय सोत्कंठते
पंचाक्षव्यसनाय पंच हि शराः पंचेषुणा स्वीकृताः ॥११॥

(प्रकाशं) वत्स लक्ष्मण।

लक्ष्मणः—आज्ञापयत्वार्यः।

रामः—

अनर्घ्यरूपामपि यस्सतां नये
धनुर्गुणारोपणमात्रशुल्कताम्।
रजतृणेन क्षितिभृत्सु कौसुभं
विमुच्य धिक्केतुमना भुवे भुवम् ॥ १२ ॥

लक्ष्मणः—आर्य त्वां प्रत्येतदेवं प्रतिभाति। कुतः।

अवलुनभुजंगलोकनाथ-
प्रियकांतास्तनपत्रभंगकांतेः।
गरुडस्य गरोद्गराद्वरीयान्
वद वल्मीकभवः कियान् फणिः स्यात् ॥ १३ ॥

रामः—वत्स कीदृशं वा तद्धनुः।

लक्ष्मणः—आर्य तत्खलु।

नभश्चरभुजावलेपहठलुंठनातस्करं
बलस्य तुलने तुला तुलितभूभृतो भूभृतः।
निशम्य तविदं धनुस्तुवहवो निवृत्ता नृपा
विशंति मवकर्कशाः कतिपये सभाभूमिकाम् ॥ १४॥

रामः—वत्स आदेशय मार्गं सभाभूमिकायाः।

लक्ष्मणः—आर्य इत इतः।

(उभौ परिक्रामतः)

लक्ष्मणः—(पुरो विलोक्य सहासं) अहो मौग्ध्यममीषां क्षत्र-बंधूनाम्। कुतः।

शैलेंद्रप्रतिपंथिबाहुशिखरे पंथानमस्मद्गिरा-
मुल्लंघ्यैव बहिःस्थिते बलवतामार्ये च धुर्ये स्थिते ।
प्राताः कर्तुमधिज्यमद्य तदमी चापं वराका वृषाः
के वा वारणकुंभपीठदलने सिंहावुतेऽन्ये मृगाः ॥ १५ ॥

रामः—(पुरो विलोक्य) कथं रथ्यांतरेषु निरुच्छ्वासो जनसंमर्दः ।

नेच्छा धौरितमध्वसादिनियतैर्वामायुकैर्लभ्यते
नीयंते विशिखांतरेषु करिणस्तिर्यक्मुखा यन्तृभिः ।
सूतैस्संहृतरश्मिभिर्नियमिता निस्पंदनाः स्यंदनाः
शस्त्राण्यूर्ध्वमुखानि बिभ्रति भटा गंतुं कृतप्रोंखिताः ॥ १६ ॥

लक्ष्मणः—(पुरो निर्दिश्य) अयमसौ सभाभूमिः ।

रामः—प्रविशाग्रतः ।

लक्ष्मणः—यदाज्ञापयति आर्यः ।

(उभौ प्रविशतः)

लक्ष्मणः—(निर्वर्ण्य) ।

उद्धूतां पटवासचूर्णसरणीं निष्ठ्यूतरक्तप्रभां
व्यत्यासाहितशक्रचापविभवामाकृष्टभृंगावलीम् ।
बिभ्रत्संप्रति लक्ष्यते स्वयमपि व्यक्तं रणमंडपः
संरंभव्यसनीव किंचन धनुर्ज्यारोपणाडंबरे ॥ १७ ॥

(हस्तेन निर्दिश्य) आर्य परिकल्पितपूर्वोऽयं यथोचितमंचः यावदलंक्रियताम् ।

रामः—यथाह वत्सः । (उपविश्य) वत्स उपविश्यताम् ।

लक्ष्मणः—यथाज्ञापयत्यार्यः । (उपविशति)

रामः—(आत्मगतं) ।

वपुर्दूरे वाचामभिवसयमनर्घ्योदरमणि-
र्न मूल्यं त्रैलोक्यं क्व च मम मुधोत्कंठितमिति ।

मयि प्राक्तु प्रेयस्याः प्रणयघटनोपायकृपणे
कृपालुः प्रातोसौ सपदि धनुरारोपणपणः ॥ १८ ॥

अतश्च पाणौ कृतामेव मन्ये विदेहराजात्मजां । येन मे—

शिथिला मिथिलाधिपात्मजायां
प्रणयालाभजडा मनोरथाः प्राक् ।
अधुना तु विशृंखलं प्रवृत्ता—
श्च्युतयंत्रा घटिता रथा यथैव ॥ १९ ॥

आश्लेष्यैव भुजद्वयेन दयितामुत्संगरंगं बला-
दारोप्यैव समर्प्य तत्करतलं दत्वैव शैत्यं शशीः ।
आघ्रायैव कुचात्कुचं गतघृणं पीत्वैव विंबाधरं
संपूर्यैव मनोरथांश्च शतशः सोच्छ्वासमस्मन्मनः ॥ २० ॥

(प्रकाशं) वत्स लक्ष्मण किमत्र धनुर्गुणारोपणाय राजन्यकैः प्रतिपाल्यते।

लक्ष्मणः—आर्य प्रेक्षकागमनं ।

रामः—कोसौ प्रेक्षकः ।

लक्ष्मणः—आर्य मिथिलेश्वरः ।

(प्रविश्य पद्मक्षेपेण)

विदूषकः—जेंदु पिअवअस्सो ।

रामः—कुतः खलु भवानियतीं वेलां चिरायितः ।

विदूषकः—किं अवरं संझोवासणप्पसंगेण ।

रामः—(सस्मितं) जाने तादृशी हि भवतो नियमानुष्ठानचुंचुता ।

विदूषकः—जइ जाणासि कुदो मं पुच्छसि ।

रामः—तिष्ठत्वेतत् । कुतो भवान् कुपितभुजंगोच्छ्वासघर्घरानाया-मिनस्तरंगितोपवीतसूत्राच्निर्मुचति श्रमशंसिनो निश्वासान् ।

---

१ जयतु प्रियवयस्यः । २किमपरं संध्योपासनप्रसंगेन । ३ यदि जानासि कुतः पृच्छसि ।

विदूषकः—वेअस्स अहं सु एत्थ एव्व आआच्छंतं महाराअजणअं दक्खिअ असंवादेण पविसिदुं तरिअं आहिंडिओ ।

रामः—किमागच्छति विदेहेश्वरः ।

विदूषकः—आँम ।

लक्ष्मणः—(पुरो निर्दिश्य) आर्य एष विदेहेश्वरः । योसौ—

उत्सारणासंभ्रमसत्त्वरेण
परिष्कृतः कञ्चुकिनां गणेन ।
आयाति गंधद्विपखेलगामी
सभां हरिः शैलगुहां यथैव ॥ २१ ॥

रामः—(दृष्ट्वा आत्मगतं) ।

हिमवानिव गंगाया लक्ष्म्या इव पयोनिधिः ।
स एष खलु सीतायाः जनको जनको नृपः ॥ २२ ॥

(ततः प्रविशति जनकः कंचुकी च)

कंचुकी—इत इतो महाराजः ।

(उभौ परिक्रामतः)

दूरादम्बरचारिभिः परिहृतं यद्वीर्यशौण्डैर्धनु—
र्मर्त्यैः कर्तुमधिज्यमद्य तदिदं को वा क्षमः स्यादिति ।
दिष्ट्या ज्यामधिरोपयेद्धनुषि यस्तस्मै महाबाहवे
दातव्या दुहितेत्यनेन च मनः क्लिष्टं च हृष्टं च नः ॥ २३ ॥

इयं च मे समर्थना ।

धन्विप्रवीरानवधीर्य सर्वा—
नानम्रभावं च न जातु याति ।
क्वेदं धनुस्तत्क्व च वज्रकांडं
शार्ङ्गं पिनाकं च धनुष्कथा नु ॥ २४ ॥

---

१ वयस्यादं खलु अत्रैवागच्छंतं महाराजं जनकं दृष्ट्वा असंवादेन प्रवेशितुं त्वरितमाहिंडितः । २ ओम् ।

कंचुकी—एतद्भद्रासनं । यावदलंकरोतु महाराजः ।

जनकः—(उपविश्य) आर्य गुरुदत्त को वात्र संप्रति निर्वर्त्यश्चैष चापाधिज्यकरणाय प्रतिपालयति क्ष्माभुजो भुजसारद्रविणानिदं धनुः ।

कंचुकी—अधुना प्रतिपालयंत्यमी नृपसिंहा अपि भर्तृदारिकां ।

जनकः—आर्य गुरुदत्त तेन हि समानीयतामिहैव वत्सा सीता ।

कंचुकी—यथाज्ञापयति महाराजः । (निष्क्रांतः) ।

विदूषकः—(जनांतिकं) वअस्स इदो एव्व आअमिस्सिदि तत्तहोदी दाणिं सफलो अम्हाणं पअंतो जेण लोउत्तरपरक्कम्मविहवस्स अत्तहोदो ण किंपि तेलोक्के दुक्करं णाम किं पुण एत्तिअमेत्तं चावाधिज्जीकरणं कम्मं ।

(ततः प्रविशति सीता विनीता कंचुकी च)

कंचुकी—इत इतो भर्तृदारिका ।

सीता—(परिक्रामंती जनांतिकं) हंजे विणीदे किं सच्चं अज्जउत्तो तहिं आअच्छइ ।

विनीता—(जनांतिकं) सो दाव अण्णूणसहअतारुण्णविक्कमो अग्मदो पविसई अण्णो पुण आअच्छेदि वा ण वा ।

सीता—हंजे अवि णाम अह्माणं मणोरहो सफलो भवे ।

विनीता—भट्टिदारिए किं तुवं साहारणमणुस्समज्झीए लहूकरेसि भट्टिणंपि रामं । सो खु सव्वहा माणुसरूपमेत्तधारि देवोत्ति समत्थेहि ता ण खु तस्स एअंपि चावजीवारोपणं विक्कमसिलाहाए पज्जत्ति ।

---

१ वयस्य इत एवागमिष्यति तत्रभवतीदानीं खलु सफलोस्माकं प्रयत्नः येन लोकोत्तरपराक्रमविभवस्यात्रभवतः न किमपि त्रैलोक्ये दुष्करं नाम किं पुनः एतावन्मात्रं चापाधिज्यकरणं कर्म । २ हंजे विनीते किं सत्यमार्यपुत्रस्तस्मिन्नागच्छति । ३ स तावदन्यूनसहजतारुण्यविक्रमोऽग्रतः प्रविशति अन्यः पुनरागच्छति वा न वा ? । ४ हंजे अपि नामास्माकं मनोरथः सफलो भवेत् । ५ भर्तृदारिके किं त्वं साधारणमनुष्यमध्ये लघूकरोषि भर्तारमपि रामं । स खलु सर्वथा मनुष्यरूपमात्रधारी देव इति समर्थयस्व तस्मान्न खलु तस्यैतदपि चापजीवारोपणं विक्रमश्लाघायाः पर्याप्तिः ।

विदूषकः— (दृष्ट्वा जनांतिकं) वअस्स एसा सु अत्तहोदी ।
रामः—(दृष्ट्वा आत्मगतं) ।

अस्या मदनधनुर्ज्या गुंजितमिव हंसखेलगमनायाः ।
मंजरिरिंसिंजित्तमिदं गाढोत्कंठं मनः कुरुते ॥ २५ ॥

इत्थं मनोत्प्रेक्ष्य ।

अनन्यतुल्योज्ज्वलरूपधानया
कृता तुलाकोटिरसोत्कृतेः पदम् ।
इति स्फुटं घोषयितुं तु बुध्यते
निजे तुलाकोटिरसौ पदद्वये ॥ २६ ॥

विनीता—(रामं दृष्ट्वा जनान्तिकं) भट्टिदारिए एसो सु भट्टा रामो ।
सीता—(सहर्षं आत्मनि) कहँ आअदो एव्व ।
कंचुकी—एष महाराजः यावदुपसर्पतु भर्तृदारिका ।
सीता—(उपसर्पति)
जनकः—वत्से इहोपविश्यतां ।

(सीता विनीता च यथोचितमुपविशतः)

जनकः—आर्य गुरुदत्त चापाधिज्यकरणाय भूमिपालमुख्यानावेदय ।
कंचुकी—यथाज्ञापयति महाराजः (हस्तमुत्क्षिप्य)

समायाता यूयं क्षितिपतिसुता विक्रमधना
धनुर्जाग्रच्चेच्छेन्नृपवरभुजैर्जित्यविधये ।
स्थितः प्रेक्षापेक्षः परिषदि महाराजजनको
बलक्रय्या प्राप्ता स्वयमपि विदेहेश्वरसुता ॥ २७ ॥

तादिदानीं ।

---

१ वअस्स एषा खलु अत्रभवती । २ भर्तृदारिके एष खलु भर्ता रामः । ३ कथमागत एव ।

यस्य स्मृत्वापि सद्यश्चकितविगलितैः खेचराग्रेसराणां
श्रांतं कांताकपोले लिखितुमपि करैस्सत्रपं पत्रभंगान् ।
तस्मिन्नारोप्य जीवां धनुषि नृपतयश्चापविद्याभियुक्ता
लोकांतं लोककांतं निजमपि च यशः स्वैरमारोपयंतु ॥ २८ ॥

लक्ष्मणः—(पुरो विलोक्य) अये कस्यचिद्बाहुशालिता नृपशार्दूलस्य । तथाहि ।

आरोप्याग्रप्रकोष्ठात्कटकमशिथिलं गाढमाबद्धकक्षो
मध्ये चारोप्य जानु क्षितिमपि चरणेनापरेणाधितिष्ठन् ।
आरोप्य ज्यां निवृत्तः कथमपि विकटं चापदंडस्य कोटे-
र्नासौ वाच्यः प्रकृत्या क इव हि विगुणः स्याद्गुणाधाननम्रः॥२९॥

जनकः—(निर्वर्ण्य) अहो नु खल्वस्य धनुष्कस्थेमा । तथाहि ।

गुणव्ययाभया वृत्तिर्गौणेति विगणय्यताम् ।
स्थेयसा धनुषा वृत्तिरन्यद्भूतैव वर्तते ॥ ३० ॥

लक्ष्मणः—आर्य पश्य पश्य ।

कश्चित्प्राप्य निरुद्यमो धनुरिदं दृष्ट्वा परो निस्पृहः
स्पृष्ट्वान्योन्यवृत्पतत्कानि कतिचिद्विन्यस्य कोपि स्थितः ।
उद्धृत्याप्यमुचत्सहैव गलता मानेन मानीतरः
प्रोत्थायैव परः स्थितो नृपपशुर्नैवोत्थितः कश्चन ॥ ३१ ॥

विदूषकः—वअस्स किं अवरं सव्वहा तुह सज्जे चेअ एअं सज्जं होइ धणुं ।

लक्ष्मणः—आर्य किमपरं विलंब्यते । यावदिदानीं ।

आरोप्य मौर्वीमवरोप्य रूढान्
मानग्रहान्मानवतां नृपाणाम् ।

१ वयस्य किमपरं सर्वथा त्वयि सज्जे एव एतत् सज्जं भवति धनुः ।

समं शिरोभिर्नमयन्त्वमीषां
कोदण्डकाण्डं पुरुषप्रकाराः ॥ ३२ ॥

रामः—यदाह वत्सः (उत्थायोपसृत्य च धनुरुद्यम्य आत्मगतं) ।

नमयति यदनंगः कौसुमीं चापयष्टिं
नमयति च यदेषा भ्रूधनुः पक्ष्मलाक्षी
तदुभयमपि दिष्ट्या दृष्टसाफल्यमेत-
न्नमयति मयि कामं चापमारोपितज्यम् ॥ ३३ ॥

(ज्यामारोप्य धनुर्नमयति) ।

सर्वे—आश्चर्यं आश्चर्यम् ।

सीता—(सहर्षमात्मगतं) संपुण्णा मे मणोरहा ।

विनीता—(जनांतिकं) भट्टिदारिए दिट्ठिआ वड्ढेम ।

लक्ष्मणः—आर्य स्थीयतां मुहूर्तमनेनैव विभ्रमेण ।

निर्निमेषमिमां शोभां विलोचनविलोभनीम् ।
पर्यंतस्थैरमार्यस्य प्रेक्षकास्तंतु निर्वृताः ॥ ३४ ॥

जनकः—

अधुना धनुर्भुजवतां भुजस्तारग्लानिशंसिमंडलितम् ।
वहति परिवेशकांतिं कांस्था शीतांशुरिव रामः ॥ ३५ ॥

रामः—(ज्यामाकर्ष धनुर्भनक्ति आकाशे पुष्पवृष्टिः क्रियते)

विदूषकः—(ससंभ्रमं) किं एअं (दृष्ट्वा) कहं भग्गं धणु वअस्सेण ।

सर्वे—आश्चर्यम् ।

सीता—(ससंभ्रमं जनांतिकं) हला किं एअं ।

विनीता—भट्टदारिए भग्गं खु धणु भट्टिणा ।

---

१ संपूर्णा मे मनोरथाः । २ भर्तृदारिके दिष्ट्या वर्द्धामहे । ३ किमेतत् । ४ कथं भग्नं धनुर्वयस्येन । ५ हला किमेतत् । ६ भर्तृदारिके भग्नं खलु धनुर्भर्त्रा ।

सीता—अम्हो लोउत्तरकोसलो उत्तरकोसलेसरो ।

लक्ष्मणः—अहो श्रुतिपथोन्मादी निर्घातनिर्घोषगंभीरो विद्धलित-हरिद्गुरो धनुर्भंगघोषः ।

दिव्यानां भयपूर्णमानशिरसां नो साधुकारध्वनिः
निर्यात्यानमतो हनुष्ककरुणं संताडितानामिव ।
नाद्यापि प्रभवंति मूर्छितधियः पुष्पाणि ते वर्षितुं
तेषां त्रासविधूनितेषु गलितं हस्तेषु पुष्पैः स्वयम् ॥ ३६ ॥

जनकः—

छिन्नागा. दृढमीलितेक्षणपुटाः शुष्यन्मवांभःप्लुवा
विस्मृत्येव च कर्णतालनमपि त्रासान्मुहूर्तं स्थिताः ।
प्रत्याश्वस्य च कर्णपल्लवयुगं संताडयंतः पुनः
मन्ये श्रोत्रमनीश्वराः कटुरिमं घोषं सहंते ध्वनिम् ॥ ३७ ॥

आर्य गुरुदत्त प्रवर्त्यतां सीतापरिणयनोत्सव इति मद्वचनाच्चियुज्यतां प्रकृतिः ।

कंचुकी—यथाज्ञापयति महाराजः । (प्रणम्य निष्क्रांतः) ।

(नेपथ्ये कलकलानंतरं)

सज्जास्ते समराय युद्धरसिकाः सन्नद्धसैन्या नृपा
येषां चापवदेव संगरकथा पार्ष्णिग्रहा पादुकैः ।
किं भूयोपि विकत्थितैर्लघुतरैरैक्ष्वाकु शक्नोषि चे-
त्सीतायाः प्रवरो वरो भवरणं कृत्वा च जित्वा च मः ॥ ३८ ॥

सीता—(श्रुत्वा समयमपवार्य) हला किं एअं ।

विनीता—(जनांतिकं) मुद्धे मा हआहि जारिसो तेसं धणुगुणारोपणसंरंभो तारिसं चेअ आहो पुरिसिआमेत्तं एअंपि अ समरसोंडिरं जाण ।

---

१ अहो लोकोत्तरकौशलः कौशलेश्वरः । २ हला किमेतत् । ३ मुग्धे मा विभेहि यादृशास्तेषां धनुरारोपणसंरंभः तादृशमेवाहो पुरुषिक्थमात्रं एतदपि च समरशौंडिर्यं जानीहि ।

रामः—(श्रुत्वा सकोपं) ।

श्रुतं श्रवणयोः प्रियं किमपरं मया स्थीयते
प्रिया वसतु वाससि स्वयशसौ सीता च मे ।
मदस्त्रहलकर्षणोपजनितां च सीतामयीं
नृपास्त्वरितमीप्सितां युधि वहंतु वक्षःस्थलैः ॥ ३९ ॥

इति संरंभते ।

लक्ष्मणः—अलमलं संरंभेण

नमयति धनुस्तच्चैवार्ये भयक्षुभितं जग-
न्नमयसि यदि भ्रूचापं त्वं रुषा विवशीकृतः ।
न कुलगिरयो न त्रैलोक्यं न चाम्बुधयः क्षणा-
त्सकुलविधुतः कोपस्तस्मात्प्रसीद विधूयताम् ॥ ४० ॥

किं चान्यत् । न चैते क्षुद्राः क्षत्रिया शदो भवतः कोपस्य पर्याप्ताः ।
पश्य ।

कक्षात्कक्षं विविक्षुं शशशिशुमशनैरप्लुतं विप्लुताक्षं
किं दृष्ट्वा हंत हंतुं कलुषयति मुधा मानसं राजसिंहः ।
यस्य क्रोधांधगंधद्विरदरदनद्वंद्वकांतराल-
स्थाली निर्मुक्तमुक्ताफलशकलशिलावंतुरा दंतपंक्तिः ॥ ४१ ॥

जनकः—(सस्मितं) ।

यैः स्पृष्टुं च न च क्षमे नृपसखैश्चापं निवृत्तं तदा
जीवारोपणचापला नृपतिभिर्वैलक्ष्यलक्षीकृतैः ।
ते यूयं क इवाधुना युधि परं रामेण बद्धः क्रुधा
युष्मास्वेव मिषत्सु येन च धनुर्भुग्नं च भग्नं च तत् ॥ ४२ ॥

किंच । उपालंभभूमिश्च भवतामयमारंभः । कुतः ।

पर्जन्यं प्रति गर्जतां मदनवस्रोतोसुचां दंतिनां
संघर्षेण मुधैव यत्किल मुहुः प्रागर्जितं गर्जितम् ।

तत्किं कर्तुमलं बलाद्गजरिपौ वृंतार्पितांघ्रिद्वये
मस्तिष्काहरणाय मस्तकतटं स्वच्छंदमुच्छिद्यति ॥ ४३ ॥

(आकाशे)

श्लाघाभूमेर्बलस्य क्षपितरिपुबलं पश्यतास्यानुभावं
स्थैर्यारूढा हि सप्तक्षितिधरपतयश्चाद्भुमश्चैष रामः ।
पश्यंति ह्याननेत्रा यदनघमृषयश्चासचारित्रनिष्ठाः
कैवल्यं प्राप्तुकामा हितमिह तदिहामुत्र च ब्रह्मदृष्टम्॥४४॥

लक्ष्मणो जनकश्च—(श्रुत्वा) कथमसौ चरमदेहधारी पुरुषोत्तमः ।

(सर्वे प्रणमंति)

लक्ष्मणः—आर्य पश्य [illegible] ।

श्रुत्वा जगद्विस्मयनीयकीर्तेः
कीर्तिं सुरेन्द्रैस्तव कीर्त्यमानाम् ।
भक्त्या भवंतं परितः स्तुवंतो
नमंति बद्धांजलयो नरेंद्राः ॥ ४५ ॥

जनकः—भृंगारस्तावत् ।

विनीता—(उत्थाय नाट्येनादाय) इदो सण्णिहिदो रअणभिंगारओ[1] । (उपनयति)

जनकः—(उत्थाय नाट्येन गृहीत्वा राममुपसृत्य] भद्रे विनीते भद्रां सीतामिहैवानय ।

विनीता—जं महाराओ आणवेदि । (तथाकरोति)

जनकः—

उर्वीं पालयितुं गुर्वीं सरत्नाकरमेखलाम् ।
राम प्रभवते दत्ता सीतासौ भवते मया ॥ ४६ ॥

---

१ इतः सन्निहितो रत्नभृंगारः । २ यन्महाराज आज्ञापयति ।

रामस्य हस्ते धारामावर्जयति ।

विदूषकः—[सहर्षं] सोहणं सोहणं[1] ।

रामः—(आत्मगतं) संपूर्णा मे मनोरथाः ।

सीता—(आत्मगतं) किंअत्थं[2] मे जम्म ।

(नेपथ्ये वैतालिकौ)

वैतालिकौ—अहो नु खलु भो सीतापरिणयनोत्सवस्य वरा लक्ष्मीः ।

प्रथमः—

जगदतितरां श्रीभिः सिद्धातपैरधुरंजितं
मरुदपि कृतो यत्रोन्मुक्तैर्जलैः सुखशीतलः ।
समभिलषितानर्थानेते समाददतेऽर्थिनो
न कृपणकथा क्वापि प्राप्तावकाशमिहोत्सवे ॥ ४७ ॥

द्वितीयः—

जगति कृतिनी सीता श्लाघ्या भृशं कुलयोषिता
रघुपतिरभूद्यस्या लोकोत्तरः सदृशः पतिः ।
किमकृत तपस्तस्या माता वधूवरमीक्षितुं
तदिति च मुदा पौरस्त्रीणां भवंति मिथः कथाः ॥ ४८ ॥

जनकः—महाभाग किं ते भूयः प्रियमुपहरामि ।

रामः—

त्वया बांधवमस्माभिर्लब्धमद्य सुदुर्लभम् ।
भूपेंद्र प्रियमस्माकमाशास्यं किमतः परम् ॥ ४९ ॥

तथाप्येतद्भवतु ।

श्रोतुं मां समुपाश्रितं सुकृतिनः स्वीकुर्वतां दर्शनं
ज्ञानं व्याप्नियतां सतामविहितं ज्ञेयेषु सर्वेष्वपि ।

---

१ शोभनं शोभनं । २ कृतार्थं मे जन्म ।

साधूनां समताबलं विभवतावृत्तं निवृत्ताक्षयं
सूक्तिस्सज्जनशंसनैकशरणा स्वैरायकीया चिरम् ॥ ५ ॥

जनकः—एवमस्तु ।

(निष्क्रांताः सर्वे) ।

इति श्री गोविंदस्वामिनः सुनुना हस्तिमल्लेन विरचिते
मैथिलीकल्याणनामनाटके पंचमोऽङ्कः ॥ ५ ॥

ग्रंथकर्तुः प्रशस्तिः ।

आ.

कृतिरियमभियुक्तैः स्वैरमास्वादनीया
रसमपरमपि स्वावर्तनेष्वादधाना ।
विजितविषणबुद्धेर्हस्तिमल्लस्य दिक्षु
प्रथितविमलकीर्तेः सूक्तिरत्नाकरस्य ॥ १ ॥

एतन्नाटकरत्नमुत्तमगुणं विभ्राजते मैथिली-
कल्याणं भृशमद्वितीयमपि सत्तेषु द्वितीयं मतम् ।
सर्वत्र प्रथिताः प्रबंधमणयः श्रीसूक्तिरत्नाकर-
प्रख्यातापरनामधेयमहतः श्रीहस्तिमल्लस्य ये ॥ २ ॥

इति प्रशस्तिः ।

समाप्तमिदं नाटकम् ।